CC-0. In Public Domain. Digitization by eGangotri

FJAB-04

फलितज्योतिषम्

आचार्यसेतुः, चतुर्थपत्रम्

मुक्तस्वाध्यायपीठम्

(Institute of Distance Education)

राष्ट्रियसंस्कृतसंस्थानम्

( मानितविश्वविद्यालयः )

# प्रश्नभूषणम्

# पथिकगमनागमनादिप्रश्नानां विचारणम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

FJAB-04

मुक्तस्वाध्यायपीठम्
(Institute of Distance Education)
राष्ट्रियसंस्कृतसंस्थानम्
( मानितविश्वविद्यालयः )

# प्रश्नभूषणम्

फलितज्योतिषाचार्यसेतुः,
चतुर्थपत्रम्

खण्डः २

## पथिकगमनागमनादिप्रश्नानां विचारणम्

पञ्चमः पाठः ०५-२३

षष्ठः पाठः २४-३३

सप्तमः पाठः ३४-४४

अष्टमः पाठः ४५-५८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

*प्रधानसम्पादकः*

**प्रो॰ एन्.आर्.कण्णन्**
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

*पाठलेखनम्*

**प्रो. वासुदेव शर्मा**
आचार्यो ज्योतिषविभागाध्यक्षश्च
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
भोपालपरिसरः, मध्यप्रदेशम्
(०५ पाठः)

**श्री उमाकान्त तिवारी**
कनिष्ठशोध-अध्येता
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
लखनऊपरिसरः, लखनऊ (उ.प्र.)
(०६-०८ पाठाः)

*सम्पादनम्*

**प्रो. वासुदेवशर्मा**
आचार्यो ज्योतिषविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.वि.)
जयपुरपरिसरः, राजस्थानम्

*प्रबन्धसम्पादकः*

**डॉ. बिनोदकुमारसिंहः**
कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

*पाठ्यक्रमसंयोजनम्*

**डा. श्यामदेवमिश्रः**
वरिष्ठसहायकाचार्यः, मु.स्वा.पीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

*प्रकाशनम्*

**प्रो. रमाकान्तपाण्डेयः**
निदेशकः, मुक्तस्वाध्यायपीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनवर्षम् : २०१३, पुनर्मुद्रणम् : २०१४, २०१५

ISBN : 978-93-82091-51-6

**© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५**
सर्वाधिकारः सुरक्षितः। नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य लिखितरूपेणानुमतिम् अप्राप्य येन केनापि माध्यमेन अस्याः पाठ्यसामग्र्याः कञ्चिदप्यंशं पुनः प्रस्तोतुम् अनुमतिः नास्ति।
प्रयुक्तकागदम् - Agro-based environment Friendly.

**पृष्ठविन्यासः**

**राजीवकुमारसिंहः**
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**दीपककुमारमुद्गलः**
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

## खण्डपरिचयः

ज्योतिषशास्त्रस्य परिचयपाठ्यक्रमे प्रश्नभूषणस्य द्वितीये खण्डे भवतां स्वागतम्। खण्डेऽस्मिन् चत्वारः पाठाः सन्ति। पञ्चमतः अष्टमपाठपर्यन्तम् विभक्तेऽस्मिन् खण्डे पञ्चमपाठे भवन्तः पथिकगमनागमनादिप्रश्नानाम् विचारम् पठिष्यन्ति। प्रश्नकुण्डलीमाध्यमेन पथिकानाम् यात्राविषये, यात्रायोगविषये, गमननिरोधकारकग्रहपरिस्थितिविषये, पथिकानाम् आगमनकालनिर्देशकग्रहपरिस्थितिविषये ज्ञानं प्राप्स्यन्ति। तथा च पथिकानां मार्गे स्थितिज्ञापकयोगाः, शीघ्रागमनयोगाः, चरस्थिरद्विस्वभावराशिवशात् च आगमने शीघ्रता-विलम्बादयः वा कथं निर्देश्याः इति पठिष्यन्ति। तत्र षष्ठे पाठे पथिकानाम् अनिष्टज्ञानम्, सधनागमनयोगज्ञानम्, आगमनकालज्ञानम् च सूक्ष्मतया पठिष्यन्ति। सप्तमेपाठे ''नौकाप्रश्न'' संज्ञके जलमार्गद्वारायात्रासम्बन्धीशुभयोगान्, उत्पातयोगान्, नौकापतेः अनिष्टकरयोगान्, लाभकरयोगान्, विशेषलाभकरयोगान् अलाभकरयोगाश्च पठिष्यन्ति। अन्तिमे च अष्टमे पाठे शत्रुप्रश्नसंज्ञके विभिन्नेषु वाद-विवादसम्बन्धीप्रश्नेषु शत्रूणाम् पराजयप्रश्ने-शत्रुपराजयोगान्, शत्रुपलायनयोगान्, शत्रुनिवर्तनयोगान्, शत्रूणाम् शुभाशुभयोगान्, शत्र्वागमनकालज्ञानविधिञ्च पठिष्यन्ति।।

—◆—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



# पञ्चमः पाठः - पथिकगमनागमनादिप्रश्नानां विचारणम्

पाठसंरचना
५.१ प्रस्तावना
५.२ उद्देश्यम्
५.३ गमनागमनयोरभावयोगः
५.३.१ गमन (यात्रा) योगस्याभावः
५.३.२ पथिकागमनयोगस्याभावः
५.३.३ उदाहरणद्वयम्
बोधप्रश्नाः
५.४ पथिकागमनप्रश्नविचारे कालनिरूपणं योगान्तरञ्च
५.४.१ ग्रहाणां गोचरभ्रमणेन कालनिरूपणम्
५.४.२ प्रश्नलग्ने पञ्चमभावे ग्रहाणाभागमनेन पथिकागमनविचारः
५.४.३ प्रश्नलग्ने एकादशभावे ग्रहाणाभागमनेन पथिकागमनविचारः
५.४.४ केन्द्रात् द्वितीये चन्द्रसंचारेण पथिकागमनविचारः
५.४.५ "विना सप्तमराशिगम्" इत्युक्तेः विमर्शः
५.५ पथिकस्य मार्गे स्थितिज्ञानयोगाः
५.५.१ सप्तमस्थचन्द्रविचारेण ज्ञानम्
५.५.२ मार्गाधिपज्ञानम्
५.५.३ राश्यर्धात् परतः संस्थितेः विचारः
५.६ पथिकस्य शीघ्रागमनयोगाः
५.६.१ राशीनां चरस्थिरद्विस्वभावनिरूपणम्
५.६.२ चतुर्थभावे चरनवांशज्ञानम्
५.६.३ प्रश्नलग्ने चरराशिचरनवांशस्थित्या शीघ्रागमनयोगः
५.६.४ चतुर्थे चरमार्गे चन्द्रे च शीघ्रागमनयोगः
५.६.५ गुरुशुक्र चन्द्राणां शीघ्रागमनयोगे महत्त्वम्
बोधप्रश्नाः
५.७ पथिकागमने चरराशिस्थ ग्रहस्य महत्त्वम्
५.७.१ ग्रहाणां वक्रत्वमार्गत्ववशात् पथिकागमने विशेषः
५.८ पथिकागमनविचारे प्रश्नकुण्डल्यां केन्द्रभावानां महत्त्वम्
५.८.१ चरस्थिर-द्विस्वभावलग्नानां विषये विशेषः
बोधप्रश्नाः
मूलपाठः
५.९ सारांशः
५.१० शब्दावली
५.११ सन्दर्भग्रन्थाः
५.१२ सहायकग्रन्थाः
५.१३ बोधप्रश्नोत्तराणि
५.१४ अभ्यासप्रश्नाः

## ५.१ प्रस्तावना

सेतुपाठ्यक्रमस्य पत्रे प्रश्नभूषणस्य द्वितीयखण्डे तत्र भवतां स्वागतम्। प्रथमखण्डे सर्वविधप्रश्नेषु उपयोगिविषयानाम् अध्ययनं भवन्तः कृतवन्तः। द्वितीयखण्डे



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



पथिकगमनागमनविषयकविचारतः समारभ्य शत्रुगमनागमननिवृत्तिप्रश्नाध्याय पर्यन्तविषयानाम् अध्ययनं भवन्तः करिष्यन्ति। तत्र दैवज्ञानां पार्श्वे प्रायः जनाः समागत्य पथिकानां गमनागमनविषयकप्रश्नान् पृच्छन्ति तत्रापि प्रवासिमनुष्यानां दूरदेशस्थ मनुष्यानां विषये पुराकाले प्रायः एतादृशाः प्रश्नाः भवन्ति स्म। परन्तु अधुनापि जनाः मम यात्रा भविष्यति वा न वा? दूरस्थः प्रवासी कुशली वर्तते वा न वा गृहे सूचना विना कोऽपि पलायितश्चेत् तस्य विषये कदा आगमनं भविष्यति? शीघ्रं विलम्बेन वा आगमनयोगः? एतादृशानाम् प्रश्नानां समाधानार्थम् अस्य पाठस्य अध्ययनम् भवद्भिः करणीयम्। तत्र पूर्ववर्तिखण्डस्य अध्ययनेन 'जीवचिन्ता' इति निर्णये जाते जीवसम्बन्धी प्रश्ने एव पथिकानामम् गमनागमनसम्बन्धी-प्रश्नानां विचारणा पाठेऽस्मिन् प्रस्तूयते।

## ५.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

- पथिकागमनयोगवाधा ज्ञास्यन्ति।
- पथिकागमनविचारे कालनिर्णये।
- कुशलतां प्राप्स्यन्ति।
- पथिकानां शीघ्रागमनयोगान् मार्गे स्थितिज्ञानं च प्राप्स्यन्ति।

## ५.३ गमनागमनयोरभावयोगः

प्रश्नकुण्डली द्वारा इदं ज्ञातुं शक्यते यत् कस्मिन् योगे गमनं यात्रा वा भवितुमर्हति कस्मिंश्च योगे आगमनं यात्रा निवृत्तिः भवति। एतद्विपरीतम् इदमपि ज्ञातुं शक्यते यत् कस्मिन् योगे गमनागमनयोरभावः भवति। अथवा अभीष्टयात्रायां विघ्नादिकं किमपि यात्रायाः अवरोधकं कारणं समुदेति येन च कारणेन गमनं न भवति एवमेव यात्रानिवृत्तौ स्वगृहे आगमनम् अर्थात् आगमनयोगे वाधाभवान् विदेशस्वगृहप्राप्तिरूपस्थानप्राप्तिः भवति। एतयोः द्वयोरेव प्रश्नयोः समाधानम् एकेन एव श्लोकेन प्रश्न समग्रन्थकारः श्रीजीवनाथझा पथिकगमनागमन प्रश्नाध्याये प्रथमे एव श्लोके एवं करोति।

### ५.३.१ गमन (यात्रा) योगस्याभावः

तत्र गमनयोगस्य अर्थात् अभीष्टकार्यार्थं यात्रायोगः कुत्रचित् स्थानविशेषे गमनयोगो वा श्लोकस्यार्धभागेन ग्रन्थकारः एवं व्यनक्ति –

**प्रश्नतनोः सुखभे दशमे वा सौम्यखगो गमनं नहि गन्तुः।**

**पदविच्छेदः** – प्रश्नतनोः, सुखभे, दशमे, वा, सौम्यखगः, गमनम्, न हि गन्तुः।

**पदान्वयः** – प्रश्नतनोः सुखभे दशमे वा सौम्यखगः गन्तुः गमनं न हि।

**प्रतिपदार्थः** – यदि प्रश्नतनोः = प्रश्नलग्नात्, सुखभे = सुखस्थानं चतुर्थभावः, तस्मिन् भे राशौ (भावे), दशमे = दशमभावे, वा सौम्यखगाः = शुभग्रहः गुरुबुध शुक्रचन्द्रेष्वन्यतम् स्थितो भवेत् "तदा" गन्तुः = गमनाभिलाषिणो, गमनम् = यात्रा न हि स्यात्, विशिष्टार्थः = यात्रा कर्तुः गृहसुखस्य परित्यागत्वात् चतुर्थे भावे दशमे भावे वा सौम्यखगस्थितिः यात्रायाः निरोधकरी कथिता। यतो हि शुभग्रहाणां दशमे स्थित्या गृहभावोपरि



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



शुभदृष्टिः गृहसुखप्रदात्री भवति। तथैव चतुर्थे भावे सौम्यखगस्थितिः अपि गृहसुखप्रदायकत्वात् यात्रायाः (गमनस्य) निरोधकरी कथिता। यदि उभयत्र दशमे चतुर्थे च सौम्यखगाः स्युः तर्हि निश्चितं यात्रायाः अभावः इति।

### ५.३.२ आगमनयोगस्याभावः

उपरिनिर्दिष्ट स्थानेषु चतुर्थभावे (सुखभे) दशमे वा यदि पापग्रहाः स्थिताः स्युः तर्हि गृहसुखप्राप्तौ बाधकत्वात् आगमनयोगः न भवति अर्थात् यात्रां कृत्वा गृहागमने बाधा भवति। एष एव आशयः निम्नश्लोकार्धे ग्रन्थकारः व्यनक्ति –

**तत्र गता यदि पाप न भोगा आगमनं न वदन्ति महान्तः॥१॥**

**पदविच्छेदः** – तत्र, गताः, यदि, पाप न भोगा, आगमनं, न, वदन्ति, महान्तः।

**पदान्वयः** – यदि तत्र पापनभोगाः गताः महान्तः आगमनं न वदन्ति।

**प्रतिपदार्थः** – यदि पूर्वोक्तनिर्दिष्टयोगविपरीतम्, तत्र = तयोः एव स्थानयोः चतुर्थ दशमयोः, पाप न भोगाः = नभसि आकाशे गच्छन्तीति न भोगाः ग्रहाः तेस्वपि = पाप न भोगाः अर्थात् पापग्रहाः (शनिभौमसूर्यराहुकेतवः) गताः = स्थिताः स्युः तदा ज्योतिषविद्याप्रवीणः, आगमनम् = यात्रानिवृत्तिः, यात्रां कृत्वा वा गृहे आगमनम् = विदेश त्स्वस्थानप्राप्तिरूपम् आगमनम्, न वदन्ति = न कथयन्ति न प्रतिपादयन्ति फलादेशम् आगमनरूपं न वदन्तीत्यर्थः।

**विशिष्टार्थः** – आगमनयोगस्याभावज्ञानार्थम् आचार्यः जीवनाथज्ञा अत्र चतुर्थे दशमे भावे पापग्रहाणां स्थितिं कारणरूपेण निर्दिशति। भवन्तः द्वादशाभावेभ्यः विचारणीयविषयेषु मित्रालयग्रामलाभो वाहनानां सुखं सुखात् माता पित्रोः सुखं क्षेत्रवाटिकादिसुखं सुखात् तथा च पितुः सुखं तथा राज्यव्यापारं राजकार्य च। पुण्यं मुद्रासुखं सर्वं चिन्तयेद् दशमाल्यात् इत्यादिकेषु श्लोकेषु चतुर्थभावतः दशमभावतश्च विचारणीयविषयान् पठितवन्त एव। तत्र सुखस्थानोपरि पापदृष्टिः तदैव निश्चितरूपेण भविष्यति यदा पापग्रहाः दशमभावे स्थिताः भवेयुः। पश्यन्ति सप्तमं सर्वे इत्यादि दृष्टिज्ञानपद्यैः एतत्सर्वं भवद्भिः ज्ञातमेव। अथ च दशमभावे पापदृष्टिः तदैव भविष्यति यदा पापग्रहाः चतुर्थभावे पापग्रहाः स्थिताः स्युः। एतत्सर्वं प्रश्नकुण्डलीचक्रे प्रश्नविद्याप्रवीणैः दैवज्ञैः चिन्तनीयम्। अत्र इदमपि चिन्तनीयं यत् ग्रन्थकारेण गमनयोगाभावविचारे तु "सौम्यखगः" एकवचनस्य प्रयोगं कृत्वा एकस्यापि शुभग्रहस्य चतुर्थे (सुखभे) वा दशमे स्थित्या गमनयोगाभावः (गमनं न हि गन्तुः) इति प्रोक्तम्। परन्तु आगमनयोगाभावविचारे "तत्र गता यदि पाप नभोगाः" इत्युक्त्या बहुवचनस्य प्रयोगं कृत्वा अत्यधिकपापग्रहाणां स्थितिः सुखभे दशमे वा आगमनं न वदन्ति महान्तः इत्युक्त्या आवश्यकरूपेण विचारणीया इति प्रोक्तम्।

अत्र प्रश्नविद्याप्रवीणैः दैवज्ञैः स्वधिया एकाधिकशुभग्रहाणां स्थित्या **'गमनं नहि गन्तुः'** अस्य प्राबल्यं तथा च त्रिन्यूनपापग्रहाणां तत्र स्थित्या आगमनयोगाभावस्य निर्बलत्वं विचार्य प्रश्नोत्तराणि कार्याणि।

### ५.३.३ उदाहरणद्वयम्

#### प्रथमं गमनाभावयोगस्योदाहरणम्

अत्र प्रश्नांगे चतुर्थे भावे गुरुः दशमे भावे च शुक्रः वर्तते। अत्र एकेनापि



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



ग्रहेण (सौम्यखगेन) गमनयोगस्याभाव भवितुमर्हति। प्रस्तुतप्रश्नांगे चतुर्थे (सुखभे) दशमे च उभयत्र सौम्यखग (शुभग्रह) स्थितत्वात् गमनयोगस्याभाव अस्मिन् प्रश्नांगे वर्तते।




द्वितीयम् आगमनयोगस्याभावोदाहरणम्

अत्र प्रश्नांगे सुखभे केतुः दशमे भावे सूर्य-शनि-राहुग्रहत्रयम् (पाप नभोगाः) स्थिताः सन्ति। अतः "तत्र गताः यदि पाप नभोगा आगमनं न वदन्ति महान्तः" अर्थात् यात्रां कृत्वा गृहे आगमनयोगस्य अभावः वक्तव्यम्।




**बोधप्रश्नाः**

१. गमनयोगस्य बाधाकारकयोगः संस्कृतश्लोके लिख्यताम् ?

२. आगमनयोगस्य अभावकारकयोगः लिख्यताम् ?

३. गमनाभावकारकग्रहाः के, भावौ च कौ ?

४. आगमनाभावकारक ग्रहाः के तेषां कस्मिन् कस्मिन् भावे स्थितिः अपेक्ष्यते।

५. गमनाभावस्य आगमनाभावस्य च विचारे सुखे दशमे च कियन्तः ग्रहाः अपेक्षिताः।

## ५.४ पथिकागमनप्रश्नविचारे कालनिरूपणं योगान्तरञ्च

प्रेयांसः पाठकाः मन्ये कोऽपि मनुष्यः किमपि कार्यं साधयितुं प्रवासे गतः सः



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



कियन्मिते समये गृहमागमिष्यति एतादृशाः प्रश्नाः जनाः प्रायः कुर्वन्ति। पथिकस्य आगमनविचारे समयसीमां ज्ञातुम् एतादृशाः प्रश्नाः अपि भवन्ति यत् अमुकः अस्माकं परिवारीयसदस्यः अकथित्वैव प्रवासे गतः कियन्मिते काले सः आगमिष्यति एतादृशानां प्रश्नान् समाधानं कर्तुं भवतां पाठ्यग्रन्थे प्रश्नभूषणे उपर्युक्तस्थानद्वये कोऽपि ग्रहः विद्यमानश्चेत् सः ग्रहः गोचरवशात् यावता काले द्वितीये स्थाने अर्थात् चतुर्थात् द्वितीये पञ्चमे भावे दशमात् च द्वितीये भावे एकादशे भावे वा यावता कालेन समागमिष्यति तावता कालेन आगमनसम्भावना द्वितीये श्लोके निर्दिष्टा। तत्र श्लोकः - कदा पथिकागमनमित्याह–

**चतुर्थतो वा दशमात् द्वितीयेऽभ्येति खेचरः।**
**यावता तावता धीरः पथिकागमनं वदेत्॥२॥**

**पदविच्छेदः** – चतुर्थतः, वा, दशमात्, द्वितीये, अभ्येति, खेचरः, यावता, तावता, धीरः, पथिकागमनं वदेत्।

**पदान्वयः** – खेचराः, चतुर्थतः वा दशमात् द्वितीये यावता अभ्येति तावता धीरः पथिकागमनं वदेत्।

**प्रतिपदार्थः** – खेचरः = खे आकाशे चरति गच्छतीति खेचरः ग्रहः, चतुर्थतः = सुखस्थानात्, वा = अथवा, दशमात् = दशमभावात्, द्वितीये = चतुर्थात्-द्वितीये पञ्चमभावे, दशमाच्च द्वितीये एकादशे भावे इत्यर्थः, यावता = यावन्मितेन कालेन अर्थात् गोचरवशात्, सुखस्थः ग्रहः चतुर्थभावस्थराशिं परित्यज्य पञ्चमभावस्थराशौ अथवा दशमभावस्थग्रहः दशमभावस्थराशिं परित्यज्य एकादशभावे यावता कालेन, यावत्संख्याकेन दिनेन मासेन वर्षेण वा, अभ्येति = समागच्छति, तावता = तावत्संख्यकेन दिनेन, मासेन, वर्षेण वा घत्यादिकेन धीरः = प्रश्नविद्याप्रवीणः ज्योतिर्विद्यापण्डितः कुशलदैवज्ञ इत्यर्थः पथिकागमनम् = पथिकस्य प्रवासिनः वा आगमनं गृहे प्रापणम्, वदेत् = कथयेत्।

**विशिष्टार्थः** – अत्र कालनिर्धारणे यद्यपि पञ्चाङ्गानां माध्यमेन ग्रहाणां गोचरपरिभ्रमणवशात् दैनन्दिनस्पष्टग्रहवशाच्च ग्रहाणां राशिपरिवर्तनं तिथिः दिनाङ्कः समयश्च सरलतया धीरदैवज्ञेन ज्ञातुं शक्यते तथापि केचन ग्रहाः शीघ्रमेव राशिपरिवर्तनं कुर्वन्ति केचन दीर्घकालेन। यथा चन्द्रः शीघ्रगतित्वात् शनिश्च मन्दगतित्वात् राशिपरिवर्तने कालस्य न्यूनत्वं दीर्घत्वं वा प्रकटयति अतः भवतां पाठकानां कृते एतज्ज्ञानम् अपि परमावश्यकं यत् मध्यम मानेन एकैकराशौ ग्रहाणां गोचरपरिभ्रमणकालः किपन्मितो भवति। तस्य ज्ञानेन पथिकागमने समयसीमायाः आकलनं सरलतया कर्तुं शक्यते येन च दिनानां मासानां वर्षाणां वा समयसीमानिर्धारणे दैवद्याः अनुमानं कर्तुं शक्नुवन्ति। अतः ग्रहाणां गोचरसंक्रमणकालः अत्र निर्दिश्यते।

### ५.४.१ ग्रहाणां गोचरभ्रमणकालनिरूपणम्

काशिकीयविश्वपञ्चाङ्गस्य सप्तत्रिंशत्तमे पृष्ठे ग्रहाणाम् एकराशौ मध्यगत्या भोगफलसमयज्ञानार्थं चक्रं निर्मितमस्ति, तदेव भवतां संज्ञानार्थम् अत्र लिख्यते तद् यथा -

| ग्रहाः | एकराशौ भोगः | ग्रहाः | एकराशौ भोगः |
|---|---|---|---|
| सूर्यः | एकमासः | चन्द्रः | सपादद्विनद्वयम् |
| भौमः | सार्धमासः | बुधः | सपादमासः |
| गुरुः | द्वादशमासाः | शुक्रः | एकमासः |



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



शनिः त्रिंशत्मासाः राहु/केतुः अष्टादशमासाः

अनेन चक्रेण ग्रहाणां मध्यमभोगकालज्ञानेन पथिकागमनावधेः स्थूलमनुमानं कर्तुं शक्यते यथा कल्प्यते चतुर्थस्थाने चन्द्रः वर्तते। एष ग्रहः सपादद्विनद्वये राशिपरिवर्तनं करोति अनेन अनुमीयते यत् चन्द्रः पञ्चमभावे सपादद्विनद्वयाभ्यन्तरे एव समागमिष्यति अत्र पञ्चाङ्गद्वारा चन्द्रराशिसञ्चारमाध्यमेन पञ्चमभावे स्थितराशौ आगमनसमयतः समारभ्य पथिकागमनसमयः प्रारभ्यते। एवमेव कल्प्यते चतुर्थे सूर्यः यदि चेत् एकमासे राशिपरिवर्तनस्थितिवशात् एष कालः अधिकः भविष्यति। एवमेव शनिग्रहवशात् त्रिंशत्मासाः अपि पथिकागमने कालः निर्णेतुं शक्यते। एतत्सर्वं प्रश्नविद्याप्रवीणेन पथिकस्य गन्तव्यस्थान परिस्थित्यादिवशात् निर्धारणीयम्।

### ५.४.२ प्रश्नलानात् पञ्चमभावे ग्रहगमनेन पथिकागमनविचारः

उपरिनिर्दिष्टश्लोके चतुर्थतः वा दशमात् द्वितीये अर्थात् चतुर्थात् द्वितीये दशमभावात् वा द्वितीये यदा गोचरवशात् ग्रहः समागच्छति तदा पथिकागमनात् भवति। अत्र वयं चतुर्थात्-द्वितीये अर्थात् पञ्चमभावे ग्रहागमनेन पथिकागमनविचारङ्कुर्मः। यदा केनचित् प्रश्नः कृतः यत् पथिकः कार्यवशात् गतः कदा तस्य आगमनं भविष्यति। अत्र उदाहरणम्

- प्रश्नदिनांकः २२.०४.२०१३
- प्रश्नसमयः प्रातः ८ वादने
- प्रश्नस्थानम् - भोपालनगरम्
- प्रश्नकुण्डली चक्रम्




अत्र भोपालपरिसर राष्ट्रियसंस्कृतसंस्थानतः प्रकाशित भोपालस्थानीय श्री भोजराजपंचाङ्गानुसारं प्रातः ७:०५ तः ८:४५ यावत् वृषलग्नमस्ति। अत्र प्रश्नकुण्डल्यां चतुर्थभावे चन्द्रमा अस्ति। पूर्वनिर्दिष्ट श्लोके निर्दिष्टमस्ति "चतुर्थतो वा दशमात् द्वितीयेऽभ्येति खेचरः" अत्र चतुर्थे चन्द्रमा वर्तते एप खेचरः (चन्द्रः) चतुर्थतो द्वितीये अर्थात् - चतुर्थस्थ सिंहराशितः पञ्चमस्थकन्याराशौ पंचांगानुसारम् २२ अप्रैलरात्रौ २६.२६ समये कन्यायाम् आगमिष्यति अर्थात् २३ अप्रैल १३ रात्रौ ४.२६ समये कन्याराशौ प्रवेशवशात् प्रश्नकुण्डलीस्थ चतुर्थभावतः द्वितीये भावे अर्थात् पञ्चमभावे आगते सत्येव पथिकागमनं भविष्यति। एवमेव यदि कश्मिंश्चित् प्रश्नांगे चतुर्थे भावे ग्रहः एव न भवेत् तर्हि दशमभावस्थग्रहवशात् एव विचारः कर्तव्यः यथा अग्रे निर्दिश्यते।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



### ५.४.३ प्रश्नलग्नतः एकादशभावे ग्रहगमनेन पथिकागमनविचारः

यथा भवद्भिः उपरिनिर्दिष्टोदाहरणेन पञ्चमभावे चन्द्रगमनात् शीघ्रमेव आगमनयोगः अधीतः तथैव कोऽपि ग्रहः एतादृशः अपि भवितुमर्हति यो हि दीर्घकालेन पथिकागमनं करोति। यथा भवद्भिः पूर्वमेव ग्रहाणां गोचरभ्रमणकालनिरूपणे पठितमेव यत् चन्द्रमा शीघ्रगलिकः ग्रहः अतः सपादद्वयदिनमिते काले एव राशिपरिवर्तनत्वात् शीघ्रमेव पञ्चमभावे समागतः। कदाचित् एतादृशः अपि ग्रहः चतुर्थे वा दशमे भवितुमर्हति यो हि दीर्घकालेन राशिपरिवर्तनं करिष्यति। यथा निम्नोदाहरणे–

प्रश्नदिनांकः – १९.०४.२०१३

प्रश्नसमयः – प्रातः १०:३० वादने

प्रश्नस्थानम् – भोपाल (म.प्र.)

प्रश्नकुण्डली चक्रम्




अत्र प्रश्नकुण्डल्यां भोपालनगरीय श्रीभोजराजपञ्चाङ्गानुसारं मिथुनलग्नमस्ति। चतुर्थे कोऽपि ग्रहः नास्ति अतः दशमभावात् द्वितीयेऽभ्येति यदा ग्रह इत्यादि पूर्वनिर्दिष्टश्लोकवशात् दशमस्थ बुधः यदा दशमात् द्वितीये भावे अर्थात् दशमस्थ मीनराशिं परित्यज्य गोचरवशात् मेषराशौ आगमिष्यति तदैव आगमनयोगसंभवः वाच्यः। श्रीभोजराजपञ्चाङ्गे दैनिकग्रह संचारे निर्दिष्टमस्ति यत् बुधः २८ अप्रैल २०१३ दिनांके १८:३० समये मेषराशौ समागमिष्यति। एष मेषराशिः निर्दिष्टप्रश्नांगे दशमात् (भावात्) द्वितीये भावे (एकादशे भावे) आसीत्। अतः **'दशमात् द्वितीयेऽभ्येति'** ग्रहः अनेन नियमेन दशमस्थग्रहः (बुधः) दशमात् द्वितीये एकादशे भावे आगमनेन २८.०४.२०१३ दिनांके १८:३० समयोत्परं पथिकागमनं सूचयति।

अत्र विशेषः – ग्रन्थकारस्य अभिमतमस्ति यत् **''चतुर्थतो वा दशमात् द्वितीयेऽभ्येति खेचरः यावता** कालेन अभ्येति तावता कालेन एव पथिकागमनं भवति। अत्र निष्कर्षः अयमेव यत् **'यावता काले'** यथा सूर्यः यदि भवेत् तर्हि एकमासे राशिपरिवर्तनात्, चन्द्रः भवेत् तर्हि सपादद्वयमिति काले, एवं गुरुः भवेच्चेत् एकवर्षपरिमिते राशिपरिवर्तनकाले, शनिश्चेत् सार्धवर्षद्वयाभ्यन्तरकाले एव पथिकागमनं गोचरवशात् सूचयन्ति। अत्र यावान् भागः चतुर्थे वा दशमे तस्य तस्य ग्रहस्य अर्थात् गोचरसमये एव पथिकागमनम् वक्तव्यम्। अस्य आगमनकालस्य पूर्वसीमा वर्तते। चतुर्थे वा दशमे स्थितग्रहस्थ पञ्चमे वा एकादशभावस्य राशौ गोचरेण प्रवेश कालः। अन्तिमसीमा वा उत्तरसीमा वर्तते पञ्चमभावस्य राशौ एकादशभावस्य राशौ वा तत्तदग्रहस्य अवस्थितिकालः। इत्थं भवद्भिः विज्ञपाठकैः



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



पञ्चाङ्गसाहाय्येन तत्तद्गोचरराशिपरिवर्तनतिथिमाध्यमेन पथिकागमनसम्बन्धीप्रश्नानां पूर्वसीमाउत्तरसीमानिर्णयं विधाय प्रश्नोत्तरं प्रदेयम्। इत्थम् अन्येऽपि अनेके योगाः प्रश्नभूषणग्रन्थेऽस्मिन् पथिकानामागमनयोगविचारेप्रदत्ताः सन्ति। तत्र अग्रे योगान्तरं विचार्यते।

### ५.४.४ केन्द्रात् द्वितीये चन्द्रसंचारेण पथिकागमनविचारः - (योगान्तरम्)

उपरिनिर्दिष्टनियमेन सर्वतः शीघ्रगतिकः ग्रहः चन्द्रः यदि प्रश्नकुण्डल्यां केन्द्रस्थानेषु स्थितः, तत्रापि चतुर्थे वा दशमे स्थितः तर्हि अन्यग्रहापेक्षया शीघ्रमेव आगमनयोगकारकः भवति यथोक्तम् –

**प्रश्नकाले यदा केन्द्रात् द्वितीये तारकापतिः।**
**आयाति पथिकस्तत्र विना सप्तमराशिमम्॥३॥**

**पदच्छेदः** – प्रश्नकाले, यदा, केन्द्रात्, द्वितीये, तारकापतिः, आयाति, पथिकस्तत्र, विनासप्तमराशिगम्।

**अन्वयः** – प्रश्नकाले यदा तारकापतिः सप्तमराशिगम् विना केन्द्रात् द्वितीये (गमिष्यति) तत्र पथिकः आयाति।

**प्रतिपदार्थः** – प्रश्नकाले = प्रश्नलग्नकुण्डल्याम्, यदा = यस्मिन् काले, तारकापतिः = तारकाः अश्विन्यादयः नक्षत्राणि तेषां पतिः स्वामी अर्थात् चन्द्रमा, विना = परित्यज्य कं परित्यज्य? सप्तमराशिगम् = सप्तमवास्थितिम् विना अर्थात् = अग्रिमेण सम्बन्धः अग्रिम केन्द्रस्थानेषु सप्तमभावम् परित्यज्य यत्र अन्यकेन्द्रस्थानेषु स्थितिवशात् इत्यर्थः साहित्येन अन्यस्यादित्याक्षेपः, केन्द्रात् = प्रथमचतुर्थदशमात्, अन्यतमस्थानात् द्वितीये = अग्रिमे भावे प्रथमात् द्वितीये, चतुर्थात् द्वितीये पञ्चमे, दशमात् द्वितीये एकादशभावे इत्यर्थः। यदा गमिष्यति, तत्र = तस्मिन् एव समये, पथिकः = मार्गचारी, आयाति = गृहे आयातीत्यर्थः।

**विशिष्टार्थः** – यथा पूर्वश्लोकेषु केनापि ग्रहेण चतुर्थे दशमे वा स्थितेन पञ्चमे, एकादशे वा आगमनात् आगमनकालः निर्दिष्टः तथैव चन्द्रः लग्ने, चतुर्थे, दशमे वा स्थित्या द्वितीये भावे आगमनेन पथिकागमनं प्रकटीकरोति। अत्र सप्तमस्थे भावस्य निषेधः एतस्मात् कारणात् कृतः यत् यदि प्रश्नांगे सप्तमभावे चन्द्रः अस्ति चेत् तर्हि पथिकम् यदि द्योतयति परन्तु अष्टमभावे आगमनम् तस्य कृते शंकामेव प्रकटिष्यति न तु आगमनयोगम् साधयिष्यतीति विशेषः।

### ५.४.५ "विना सप्तमराशिगम्" इत्युक्तेः विमर्शः

प्रेयांसः पाठकाः भवद्भिः पूर्वयोगे पठितम् यत् प्रथमभावात् केन्द्रात् द्वितीयभावे चतुर्थस्थानात् (केन्द्रात्) पञ्चमस्थाने (द्वितीयस्थाने) दशमस्थानात् (केन्द्रात्) ना एकादशस्थाने (द्वितीये स्थाने) यदि चन्द्रः आगच्छति चेत् तर्हि पथिकस्यागमनम् सूचयति। परन्तु केन्द्रस्थानेपु सप्तमस्थानस्यापि ग्रहणम् भवति अतः सप्तमस्थानात् (केन्द्रात्) यदा द्वितीये अर्थात् अष्टमस्थाने यदा चन्द्रः समागच्छति चेत् सः आगमनयोगे बाधाकारकः अतः **"विना सप्तमराशिगम्"** इत्युक्तम् यतो हि अष्टमस्थानम् मृत्युस्थानम् अत एव ग्रन्थकर्त्रा विना सप्तमराशिगम् इत्युक्तम्। अत एव अग्रे श्लोके सप्तमस्थचन्द्र वशात् पथिकस्य पथि स्थितिम् स स्पष्टतया प्रकटीकरोति। यतो हि पथिकस्य मार्गे स्थितिः कारणद्वयेन भवति एकस्य तु भवति गृहे आगमनार्थम्, एका भवति, अग्रे यात्रायाः कार्यक्रमदर्शनार्थम्, अन्यत् भवति संकटे समुपस्थिते मार्गे अवशेष कारणत्रयमेव पथिकागमनयोगे बाधाकारकम् अतः इयमुक्तिः पथिकागमनयोगे बाधाकारकत्वेन उक्ता।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



6. सूर्यः कतिदिनेषु राशिं भुनक्ति।

7. केन्द्रस्थानेषु कुत्रस्थितः ग्रहः राशिपरिवर्तनेन पथिकागमनम् सूचयति।

8. कस्मिन् केन्द्रे स्थितः ग्रहः पथिकागमनं न सूचयति।

9. केषु केन्द्रेषु स्थितः चन्द्रः द्वितीये आगमनेन पथिकागमनम् ब्रूते।

10. चन्द्रातिरिक्तग्रहाणाम् कयोः स्थानयोः ग्रहस्थितिः आगमनयोगं प्रकटीकरोति।

11. चन्द्रद्वारा आगमनयोगनिर्धारणे कः विशेषः।

## ५.५ पथिकस्य मार्गे स्थितिज्ञानयोगाः

प्राचीनकाले देशान्तरेषु गमने अतीव समयः यात्रायां व्यसी भवति-स्म। अधुना संचारसाधनानां यात्रासाधनानाम् च वृद्धित्वात् एष समयः लघु जातः। सूचनापि प्रायः मार्गे स्थाने स्थाने स्थितेः परिचायिकापि मोबाइल दूरभाषादिभिः दातुं शक्या एव। परन्तु कदाचित् यदा सूचना न प्राप्यते पथिकः संकटे वा अस्ति चेत् तर्हि जनाः दैवज्ञानां पार्श्वे गत्वा परिपृच्छन्ति। अतः पथिकस्य मार्गे स्थितिप्रदर्शकयोगानाम् आवश्यकता, तदैव भवति। अस्य पूर्वश्लोके "विनासत्रमराशिगम्" अनया उक्त्या सह सम्बन्धः अतः ग्रन्थकर्ता सप्तमस्थानात् विचारणीयविषयेषु "परैःयमम् विवाम वारिष्टम् व्यसनम् तथा। गमागमौ कलत्रञ्च चिन्तयेत् सप्तमासमात्" इति कथयति।

### ५.५.१ सप्तमस्य चन्द्रविचारेण ज्ञानम्

सप्तमस्थ चन्द्रमा पथिकस्य मार्गे स्थितिज्ञापकनवमभावः अपि मार्गस्य प्रतिनिधि- भावः यतो हि "यात्रादीक्षाध्वकर्माणि चिन्तयेन्नवमालयात् अत्र अध्व (मार्ग) चिन्तनम् नवमात् भवति अतः मार्गेशः मार्गाधिपो वा नवमेशः भवति। अतः सप्तमस्थ चन्द्रवशात् प्रथमम् पथिकस्य पथिस्थितिम् स्पष्टयति ग्रन्थकर्ता यथा –

**सप्तमस्थो यदा चन्द्रः पथिकः पथि वर्तते।**

**पदविच्छेदः** – सप्तमस्थः, यदा, चन्द्रः, पथिकः, पथि, वर्तते।

**पदान्वयः** – यदा चन्द्रः सप्तमस्थः पथिकः पथि वर्तते।

**प्रतिपदार्थः** – यदा = प्रश्नकाले, प्रश्नकुण्डल्याम्, चन्द्रः = चन्द्रग्रहः, सप्तमस्थः = सप्तमभावे स्थितः, तदा इदं जानीयात् यत् पथिकः = यस्य पथिकस्य विषये प्रश्नः सः पथिकः, पथि = मार्गे वर्तते इति जानीयात्।।

**विशिष्टार्थः** – अत्र अन्यग्रहापेक्षया चन्द्रस्य स्थितिः सप्तमस्थाने पथिकस्य पथि स्थितिम् ज्ञातुम् अतिमहत्त्वपूर्णा वर्तते। अतः केवलम् चन्द्रः एव गृहीतः।

### ५.५.२ मार्गाधिपज्ञानम्

मार्गे पथिकस्य स्थितिज्ञानार्थम् श्लोकोत्तरार्धः एवम् प्रोक्तः –

**मार्गाधिके वा राश्यर्धात् परतो यदि संस्थितः।।४।।**

**पदविच्छेदः** – मार्गाधिपः, वा, राश्यर्धात्, परतः, यदि, संस्थितः।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**पदान्वयः** – यदि वा मार्गाधिपः राश्यर्धात् परतः यदि संस्थितः।

**प्रतिपदार्थः** – यदि, वा = अथवा, मार्गाधिपः = मार्गस्थानस्य स्वामी राश्यर्धात् परतः = यस्य कस्यापि राशिः अर्थात् अर्धभागात् पञ्चदशांशा इत्यर्थः परतः अग्रे १६ अंशतः ३० अंश पर्यन्तम्, स्थितः = प्रश्नकुण्डल्याम् यत्र कुत्रापि यस्मिन् कस्मिन्नपि भावे स्थितः स्यात् तदा पथिकः पथि वर्तते इति जानीयात्।

**सरलार्थः** – अत्र श्लोकार्धे यथा पूर्वम् केवलम् चन्द्रमसः सप्तमे स्थितिः प्रोक्ता। तत्र वा इति विकल्पेन अर्थात् चन्द्रः यदि सप्तमे न भवेत् तर्हि मार्गाधिपः = पूर्वम्, व्याख्यातम् यत् नवमस्थात् अध्व = मार्गविचारः भवति अतः मार्गाधिपः नवमेशः इति व्याख्यातम्। यदि प्रश्नकुण्डल्याम् मार्गाधिपग्रहस्पष्टः (तात्कालिकग्रहस्पष्टवशात्) यस्मिन् कस्मिन्नपि राशौ राश्यर्धात् पञ्चदशांशात् परतः भागेषु अंशेषु स्थितः स्यात् तर्हि पथिकागमनम् प्रकटीकरोति।

### ५.५.३ राश्यर्धात् परतः संस्थितेः विचारतः

भवन्तः सर्वे जानन्ति यत् ग्रहः निर्दिष्टसमये एव राशिभोगम् करोति। तत्र प्रश्नसमये अभीष्टप्रश्नलग्नम् विज्ञाय अभीष्टप्रश्नकालस्य स्पष्टाः ग्रहेः विज्ञेयाः। तत्र प्रश्नांगे यः नवमेशः मार्गाधिपः स यदि स्पष्टराश्यादिवशात् (गोचरे) राश्यर्धात् = मार्गाधिपाधिष्ठित राशौ अर्धभागात् पञ्चदशांशात् परतः अग्रे यदि भवेत् सः पथिकस्य पथि स्थितिज्ञापकः मार्गाधिपः भवति।

अत्र प्रथमे उदाहरणे चन्द्रः सप्तमस्थः अत्र पथिकः पथि वर्तते

द्वितीये उदाहरणे – मार्गाधिपः (नवमेशः) मार्गस्थाने नवमस्थाने एव राश्यर्धात् परतः (राशेः उत्तरार्धभागे) सप्तदशांशे विंशति – कसायाम् चत्वारिंशत् विकल्पायाम् स्थितः अतः मार्गाधिपो वा राश्यर्धात् परतः यदि स्थितः 'पथिकः पथि वर्तते' इति सिद्धयति।

अत्र प्रदत्ते तृतीये उदाहरणे सप्तमस्थः चन्द्रः अपि अस्ति, मार्गाधिपः शुक्रः अपि दशमाभावे 'दाश्यर्धात् परतः' स्थितः। अस्मिन्नुदाहरणे एकमन्यदपि वैशिष्ट्यम् यत् 'चतुर्थतो वा दशमात् द्वितीयेऽभ्येति खेचरः। यावता तावता धीरः पथिकामनम् वदेत् इति पूर्वोक्तश्लोकेन दशमस्थ ग्रहः शुक्रः अनितमेऽभेऽस्ति अतः शीघ्रमेव दशमात् द्वितीये एकादशे भावे शुक्रस्य आगमनं पथिकागमनम् अपि ब्रूते।

अत्र प्रायः प्राश्निकाः पथिकागमनयोगे ज्ञाते आगमनयोगस्य अविधम् अपि ज्ञातुमिच्छन्ति अतः ग्रन्थकारेण विषयेऽस्मिन् शीघ्रागमनयोगः विचारितः। एतादृशानाम् योगानाम् अपि शीघ्रागमनयोगनाम्ना तेषाम् विचारः कृतः स एव विचरः अत्र निर्दिश्यते।

## ६.६ पथिकस्य शीघ्रागमनयोगाः

यथा पथिकागमनयोगे अन्य खेचराणाम् माध्यमेन "चतुर्थक्ते वा दशमात् द्वितीयेऽभ्येति खेचरः" इत्युक्तः, तत्रैव चन्द्रद्वय "प्रश्नकाले यदा केन्द्रात् द्वितीये तारकापतिः आयाति पथिकस्तत्र" इत्युक्तः। अत चन्द्रस्य वैशिष्ट्यम् स्वीकृत्य केन्द्रेषु चतुर्थस्थानस्य (गृहस्थानत्वात्) महत्त्वम् स्वीकृत्य चन्द्रद्वये एव तत्क्षणे एव प्रवा आगमनम् पत्रिका गमनम् सूचनाप्राप्तिर्वा निर्दिष्टा तद् यथा –



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**चराङ्गे चरभागेऽपि चतुर्थे यदि चन्द्रमाः।**
**आयाति तत्क्षणादेव प्रवासी पत्रिकाऽपि च॥५॥**

**पदविच्छेदः** – चराङ्गे, चरभागे, अपि, चतुर्थे यदि, चन्द्रमाः, आयाति, तत्, क्षणात्, एव, प्रवासी, पत्रिका, अपि च।

**पदान्वयः** – यदि चन्द्रमाः चराङ्गे चरभागे चतुर्थे तत्क्षणात् एव प्रवासी पत्रिका अपि च आयाति।

**प्रतिपदार्थः** – यदि = प्रश्नकुण्डल्याम्, चन्द्रमा, चराङ्गे = चरराशीनाम्, अङ्गे अर्थात् लोन, अपि चार्थे, चरभागे = चरराशीनाम्, भागेऽर्थात् नवांशे, चतुर्थे = प्रश्नलग्नचक्रे चतुर्थभावे, **''यदि भवति चेत्''** तत्क्षणात् = तस्मिन्काल एवेत्यर्थः अत्र सप्तम्यर्थे पञ्चमी, प्रवासी = पथिकः (विदेशस्य जनः) अपि च वार्थे पत्रिका = सूचना बोधकपत्रादिकम् अथ च आधुनिकमते एस.एम.एस.-ई.-मेल., आदिकम् कुशलादिबोधकसूचकम्, आयाति = प्राप्यते इत्यर्थः।

**विशिष्टार्थः** – वस्तुतः शीघ्रागमनयोगविचारे चन्द्रस्थितिद्वारा चरराशिस्थित्या चरनवांशे वा स्थित्या तत्रापि चतुर्थभावे स्थितिवशात् ग्रन्थकर्ता अतिशीघ्रमेव तत्क्षणादेव पथिकस्य आगमनं तत्सम्बन्धिसूचनायाः वा प्राप्तिः निर्दिष्टा। अत्र भवद्भिः विषयेऽस्मिन् प्राथम्येन राशीनाम् चरस्थिरद्विस्वभावादिभेदाः, चरनवांशादिस्थितिज्ञानम् च शिक्षणीयम्।

### ५.६.१ राशीनाम् चरस्थिरद्विस्वभावनिरूपणम्

प्रियपाठकाः द्वादशराशीनाम् चरस्थिर-द्विस्वभावादिकम् एवम् अस्ति। तत्र चरराशयः - मेषः, कर्कः, तुला, मकरः। स्थिरराशयः - वृषः, सिंहः, वृश्चिक, कुम्भः, द्विस्वभावराशयः, मिथुनः, कन्या, धनुः, मीनः। पूर्वोक्त श्लोकवशात् चराङ्गे, चरभागे, चतुर्थे इति पदत्रयम् चन्द्रस्य स्थितिद्वारा शीघ्रागमनबोधकम्। अत्र चरराशिनिदर्शनेन भवन्तः इदम् ज्ञातुम् शक्नुवन्ति यत् एष योगः मेष कर्क तुला मकर प्रश्नलग्ने एव घटते। यतो हि एष चतुर्षु लग्नेषु चरराशिः लाने भविष्यति अतः चतुर्थेऽपि भावे चरराशिः एव भविष्यति।

अत्र एषु चतुर्षु प्रश्नलग्नेषु ''चराङ्गे'' (चतुर्थभावे) चन्द्रमा शीघ्रागमनं सूचयति। अत्र 'चरभावेऽपि' शब्दस्य प्रयोगः पथिकागमनयोगे आयाति। तत्क्षणादेव प्रवासी पत्रिकाऽपि च इति फलम् सूचयति। तस्य ज्ञानार्थम् च स्थाने अर्थात् चरनवांशे चन्द्रमा यदि चतुर्थभावे स्थितः तदैव तत्क्षणात् आगमनम् सूचयति अतः चरभावगमनम् कथम् भवति तत् प्रस्तूयते।

### ५.६.२ चतुर्थभावे चरनवांशज्ञानम्

भवद्भिः प्रथमखण्डे चतुर्थे पाठे नवांशादिज्ञानविधिः पठितः। अत्र केवलम् 'चरभांशे' शब्दस्य व्युत्पत्तिदृष्टया चरनवांशे चन्द्रस्थिति ज्ञानार्थम् प्रयासो विधेयः। चरराशीनाम् नवांशे यदि चन्द्रः भवेत् तर्हि शीघ्रागमनम् सूचयति। तत्र प्रश्नलग्ने (चराङ्गे) मेषकर्कतुलामकराणामन्यतमे चन्द्रमा भवेत् अथवा चरनवांशे भवेत् अर्थात् चरराशीनाम् नवांशे भवेत्। तत्र चन्द्रमा मेषकर्कतुलामकरेषु अवस्थितेऽपि नवांशचक्रेऽपि मेषकर्कतुलामकरेष्वन्यतमराशौ यदि स्थितः तदा तत्क्षणात् आगमनम् सूचयति। तत्र मेषराशौ प्रथमः, चतुर्थः, सप्तमः, एव नमांशः चरभागः। कर्कराशौ अपि प्रथमः, चतुर्थः, सप्तमः, नवांशः चरभागः। तुलाराशावपि प्रथमः चतुर्थः सप्तमः नवांशः चरभागः मकरराशावपि प्रथमः चतुर्थः सप्तमः नवांशः चरभागः भवति। तत्र पाठकाः सरलतया चतुर्षु अपि चरप्रश्नलग्नेषु



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



(चराङ्गे) चतुर्थे वा भावे चन्द्रस्पष्टमाध्यमेन प्रथमनवांशे ० अंशतः ०३-२० पर्यन्तम्, चतुर्थेनवांशे १० अंशतः १३-२० पर्यन्तम्, सप्तमे नवांशे २० अंशतः २३-२० पर्यन्तम् स्थितिः एव तत्क्षणे पथिकागमनम् पत्रिकागमनम् च सूचयति। यथा अत्र पृथक् पृथक् चराङ्गस्य चरभागगतचन्द्र द्वारा, चरभागगतचन्द्रेण चतुर्थमानस्थित्या च उदाहरणद्वारा स्पष्टता क्रियते।

### ५.६.३ प्रश्नलग्ने चरराशिस्थे, चरभागगगतचन्द्रेण च शीघ्रागमनयोगः

अत्र प्रश्नलग्ने मेषगते चन्द्रे च चरभागे अस्य उदाहरणम् –

लग्नस्पष्टम् ०-२-३-१, चन्द्रस्पष्टम् ३-१०-१० अत्र प्रश्नलग्नः मेषः चर राशिस्थः। प्रश्नलग्ने नवांशः अपि मेषस्य (चरराशेः) तत्रस्थः चन्द्रः अपि (चरभागे) मेषराशेः एव नवांशे अतः **"आयाति तत्क्षणादेव प्रवासी पत्रिकापि च"** सिद्धयति।

### ५.६.४ चतुर्थे (भावे) चरभागे चन्द्रे च शीघ्रागमनयोगः

प्रेयांसः पाठकाः मन्ये मेषप्रश्नलग्ने एव चन्द्रमा यदि चतुर्थे स्थितः तदा कर्कराशिगतत्वात् शीघ्रागमनकारकः। तत्र चरभागेऽपि अस्ति तदा तत्क्षणादेव आगमनकारकः। अत्र लग्नस्थरूपम् ०-२, ३-१०, चन्द्रस्पष्टम् ३-११-१२-२० अत्र मेष प्रश्न लग्ने चतुर्थभावे कर्कराशिः तत्र गतः चन्द्रः चरराशौ तु अस्त्येव। नवांशविचारेणापि कर्कराशौ चतुर्थनवांशः तुलाराशिगतत्वात् चरराशेः एव, अतः अत्र चराङ्गे चरभागेऽपि चतुर्थेन्यदि चन्द्रमा योगोऽयं संघटते अतः तत्क्षणात् आगमनकारकः।

इत्थम् अन्यचरराशिस्थलग्नेषु कर्कतुलामकरेष्वपि अनेके योगाः चराङ्गस्थितचन्द्रेण, चतुर्थभावस्य चन्द्रेण, चरभागस्य चन्द्रेण च भवद्भिः पाठकैः निर्मातुं शक्यन्ते।

### ५.६.५ गुरुशुक्रचन्द्राणाम् शीघ्रागमनयोगे महत्त्वम्

प्रेयांसः पाठकाः पथिकस्य शीघ्रागमनयोगविचारे यथा चन्द्रमसः महत्त्वपूर्ण-भूमिका वर्तते तथैव शुभग्रहेषु गुरुशुक्रयोः अपि महत्त्वपूर्णभूमिका अस्ति। द्वादशमासेषु यथा केन्द्रात् द्वितीये तारकापतेः आगमनेन आगमनयोगविचारः सौम्यखगानाम् सुखभे दशमे च स्थित्या गमनयोगनिवृत्तिः।

चतुर्थतो वा दशमात् द्वितीये कस्यापि ग्रहस्य (खेचरस्य) गमनात् पथिकागमनकालनिर्णयः, सप्तमस्थचन्द्रात् पथिकस्य पथे स्थितिः, मार्गाधिपस्य (नवमेशस्य) राश्यर्धात् परतः स्थित्या मार्गे पथिकस्य स्थितिविचारः चरलग्ने, चरनवांशे, चतुर्थे (चरराशौ) च चन्द्रस्थित्या तत्थात् प्रवासी आगमनम्, सूचनाप्राप्तिश्च निर्णेया। तथैव गुरुशुक्रचन्द्रस्य चतुर्थभावस्थित्या अथ च प्रश्नलग्नतः गुरुशुक्रयोः द्वितीये वा तृतीयभावेऽपि स्थित्या गृहगतः पथिकः ज्ञातुम् शक्यते। एतद्विचारमुद्दिश्य ग्रन्थकर्ता निम्नश्लोकद्वयेन गृहागतपथिकयोगम् व्यनक्ति। तद् यथा –

**जीवो वा भार्गवो वाऽपि चन्द्रो वा सुखवेश्मनि।**
**पथिकं गृहमायान्तम् जानीयात् प्रश्नवित्तदा॥६॥**

**गुरुशुक्रौ द्वितीये वा तृतीये प्रश्नलग्नतः।**
**तथा गृहागतं विद्यात्पथिकं नात्र संशयः॥७॥**



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**पदच्छेदः** – जीवः, वा, भार्गवः, वा, अपि, चन्द्रः, वा, सुखवेश्मनि, पथिकम्, गृहम्, आयान्तम्, जानीयात्, प्रश्नवित् तदा, गुरुशुक्रौ, द्वितीये, वा, तृतीये, प्रश्नलग्नतः, तदा, गृहागतम्, विद्यात्, पथिकम्, न, अत्र, संशयः।

**अन्वयः** – जीवः वा भार्गवः वा अपि वा चन्द्रः सुखवेश्मनि (स्थितः) तदा प्रश्नवित् गृहम् आयान्तम् पथिकम् जानीयात्। प्रश्नलग्नतः गुरुशुक्रौ द्वितीये वा तृतीये (स्थितौ) तदा गृहागतम् पथिकम् विद्यात् अत्र संशयः न।

**प्रतिपदार्थः** – जीवः = बृहस्पतिः, वा = अथवा, भार्गवः = शुक्रः, वा = अथवा, अपि वा = संयुक्तो वा, चन्द्रः = चन्द्रग्रहः, सुखवेश्मनि = सुखभावे चतुर्थभावे इत्यर्थः, (स्थितः), तदा = तस्मिन् प्रश्नलग्ने, प्रश्नवित् = प्रश्नविद्याप्रवीणः प्रश्नानाम् तत्त्वम् वेत्तीति प्रश्नवित्, गृहम् आयान्तम् = स्वगृहे आगतम् प्राप्तम् आगच्छन्तम् वा पथिकम्, जानीयात् = पथिकः गृहे आगतः इति ज्ञातम् भवति। तथा = तेनैव प्रकारेण, प्रश्नलग्नतः = पथिकागमनविषये प्रश्नः यस्मिन् समये भवेत् तत्र यत् प्रश्नलग्नम् ततः, गुरुशुक्रौ = द्वावपि ग्रहौ, द्वितीये = द्वितीयभावे, वा = अथवा, तृतीये = तृतीयभावे स्थितौ तदा, गृहागतम् = गृहप्राप्तम्, पथिकम् = प्रवासिनम् दूरदेशे-गतम् जनमित्यर्थः, विद्यात् = जानीयात्, अत्र प्रश्नोत्तरे, संशयः = सन्देह न कार्यः अर्थात् निश्चितम् ब्रूयादित्यर्थः।

**विशिष्टार्थः** – अत्र विशेषता वर्तते यत् प्रश्नलग्नातिरिक्तम् चतुर्थभावस्य यथा विशेषमहत्त्वं चन्द्रस्थितिवशात् पथिकागमने प्रोक्तम् तथैव गुरुः शुक्रः वा एतत्त्रयमेव चतुर्थभावे स्थित्या गृहमायान्तम् पथिकम् निर्दिशन्ति। तत्र गुरुशुक्रौ एकत्रतो भूत्वा द्वितीये भावे तृतीये भावे वा यदि स्थितौ तदापि गृहागतम् पथिकम् निर्दिशन्तीति वैशिष्टयम्। अत्र गुरुः द्वितीयभावे, शुक्रः तृतीये भावे भवेत्, अथवा गुरुः तृतीये भावे, शुक्रः द्वितीये भावे स्यात् तदापि प्रश्नवित् स्वबुद्धया विचार्य प्रश्नोत्तरम् दद्यात् पथिकः गृहे सम्प्राप्तः इति वदेत् इति भावः।

एवम् अनेकोदाहरणानि प्रश्नविद्भिः स्वबुद्धया विचार्य निर्मातुं शक्यन्ते। वस्तुतः प्रथमभावतः समारभ्य चतुर्थभावपर्यन्तम् चन्द्रः गुरुः, शुक्रः एतत्त्रयमेव पथिकागमने शीघ्रकार्यसाधकग्रहाः सन्ति। तत्र द्वितीये तृतीये भावे चतुर्थे वा गुरुशुक्रौ पथिकम् गृहमायान्तम् कुरुतः। चन्द्रश्च चन्द्रलग्ने चतुर्थे वा स्थितः पथिकागमनम् शीघ्रमेव करोतीति भावः सर्वत्र अभिव्यंज्यते। अत्र एकम् तथ्यम् तु सुनिश्चितम् यत् चरराशिस्थाः। ग्रहाः प्रश्नकुण्डल्याम् लग्ने स्थिताः सन्तः शीघ्रागमनयोगम् कुर्वन्ति।

**बोधप्रश्नाः**

१२. चरप्रश्नलग्नानि कानि।

१३. चन्द्रमा चतुर्थभावे कस्मिन् कस्मिन् राशौ स्थितः आगमनयोगकारकः।

१४. गुरुशुक्रौ कस्मिन् भावे गृहागतम् पथिकम् कुरुतः।

१५. चरभाग शब्दस्य कोऽर्थः?

१६. तत्क्षणात् आगमनयोगबोधकयोगः कः?

## ५.७ पथिकागमने चरराशिस्थग्रहस्य महत्त्वम्

प्रबुद्धाः पाठकाः? भवन्तः इदम् तु ज्ञातवत एव यत् पथिकागमनयोगविचारे



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



चरप्रश्नलग्नानाम् अत्यधिकम् महत्त्वमस्ति। तत्रापि प्रश्नांगचक्रे चरराशिस्थाः ग्रहाः आगमनयोगनिर्माणे शीघ्रत्वज्ञापकाः भवन्ति। तत्रापि नवग्रहेषु विशेषतया यथा गुरुशुक्रचन्द्राणां भूमिका भवद्भिः ज्ञाता। तथैव शुक्रबुधसूर्यशनैश्चरग्रहाः अपि प्रश्नांगचक्रे चरराशिगाः यदि भवन्ति चेत् तत्रापि विशेषतया चरप्रश्नलग्ने यदि एतेषु अन्यतमः अपि स्थितः तदा प्रवसिनः शीघ्रागमनयोगम् विदधाति अयमेव भावः निम्नश्लोके प्रकटितः। तद् यथा –

**शुक्रज्ञरविमन्दानामेकोऽपि चरराशिगः।**
**प्रवासी शीघ्रमायाति न च वक्री यदा तदा॥८॥**

**पदच्छेदः** – शुक्र-ज्ञ-रवि-मन्दानाम्, एकः, अपि, चर राशिगः, प्रवासी, शीघ्रम्, आयाति, न, च, वक्री, यदा, तदा।

**अन्वयः** – शुक्रज्ञरविमन्दानाम् एकः अपि (ग्रहः) चरराशिगः (तदा) प्रवासी शीघ्रम् आयाति न च वक्री तदा (एव प्रवासी शीघ्रमायाति)।

**प्रतिपदार्थः** – शुक्रज्ञरविमन्दानाम् = शुक्रः बुधः सूर्यः शनैश्चरश्चैतेषु ग्रहेषु, एकः = अन्यतमः, अपि, चरराशिगः = चरराशीनाम्, प्रश्नलग्ने यदि गतः भवेत्, (तदा), प्रवासी = पथिकः, अन्यत्र प्रवसनशील इत्यर्थः, शीघ्रम् = सत्वरमेव (गृहम्), आयाति = गृहागमनयोगम् निर्मातीत्यर्थः। (परन्तु एतेषु ग्रहेषु) एकतमः अपि ग्रहः न च वक्री = वक्रगतिः न भवेत् तदा एव आगमनम् सूचयति।

अत्र विशेषः – शुक्रबुधसूर्यशनैश्चरेति चत्वारः ग्रहाः अत्र चरराशिस्थाः शीघ्रागमनयोग-विधायकाः प्रोक्ताः। चरराशिशब्देन चरलग्नगताः एव ग्राहयाः। एतेषु चतुर्षु ग्रहेषु एकः अपि ग्रहः चरराशिलग्ने स्थितः शीघ्रागमनम् करोतीति भावः परन्तु चतुर्षु ग्रहेषु सूर्यः वक्री न भवति अतः अन्ये त्रयः ग्रहाः वक्रिणः यदि भवेयुः अथवा एतेषु त्रिषु एकः अपि ग्रहः वक्री स्यात् एते चरराशिगताश्चापि भवेयुः तदापि आगमनयोगे बाधाकारकः। वस्तुतः शुक्रबुध सूर्यमन्दानाम् चरराशिलग्ने शीघ्रागमनयोगे महत्त्वमस्ति।

### ५.७.१ ग्रहाणाम् वक्रत्वमार्गत्ववशात् पथिकागमने विशेषः

भवद्भिः पूर्वमपि अधीतम् यत् चतुर्थभावे वा दशमात् द्वितीयेऽभ्येति खेचरः तदा पथिकागमनम् भवति। परन्तु एतदपि तदैव भवति यदा मार्गीग्रहः एव चतुर्थे वा दशमे भवेत् यदि वक्रीग्रहः चतुर्थे दशमे वा भवेत् तदा सः ग्रहः चतुर्थतः द्वितीये भावे अर्थात् पञ्चमे भावे न गमिष्यति अपि तु वक्रीगत्या राशिपरिवर्तनम् कृत्वा तृतीये भावे गमिष्यति। एवमेव दशमभावे यदि वक्रीग्रहः तदा सः दशमात् विपरीतगत्या नवमभावे गमनम् करिष्यति न तु एकादशे भावे। अतः पथिकागमने बाधा भविष्यति। एष एव विषयः स्पष्टतया निर्दिशन् ग्रन्थकारः प्रवासिनः शीघ्रागमने चरराशिगतानां शुक्रज्ञरविमन्दानाम् महत्त्वम् प्रतिपादयति तथा च वक्री मार्गी ग्रहस्थितिवशात् पाथिकागमनयोगनिर्माण कारकग्रहपरिस्थितौ बाधाकारकत्वम् निर्दिशति– **"न च वक्री यदा तदा"**। अत्र पाठकैः अवधेयम् यत् भोमादिपञ्चग्रहाः कदाचित् मार्गिणः अपि भवन्ति कदाचित् वक्रिणः अपि भवन्ति राहु केतू द्वावपि ग्रहौ सदा वक्रिणौ भवतः। सूर्यचन्द्रौ सदा मार्गीगत्या चलतः। अनेन क्रमेण शुक्रबुधशनैश्चरेति ग्रहत्रयम् तदा एव प्रवासिनाम् शीघ्रागमने योगकारकाः भवन्ति यदा मार्गिणः भूत्वा चरराशिषु गताः स्युः॥

यदा एते ग्रहाः चरराशिगताः सन्तः यदि वक्रीगतयः भवेयुस्तदा प्रवासीजनानाम् शीघ्रागमने तावत्पर्यन्तम् बाधाकारकाः भवन्ति यावत्पर्यन्तम् ते ग्रहाः मार्गीगतयः न स्युः। एतत्सर्वम् पञ्चाङ्गमाध्यमेन ज्ञातुम् शक्यते।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



यथा १३ अप्रैल २०१२ दिनाङ्के तुलालग्ने कस्यचित् पथिकस्य आगमनविषये प्रश्नो जातः। जयपुरनगरे ज्योतिषसम्राट्पञ्चाङ्गानुसारम् अस्मिन् प्रश्नांगचक्रे तुला लग्नम् चरलग्नम् शुक्रकेतुश्च अस्ति।

तुलालग्नम् सायम् ६-५१ त. रात्रौ ९-९ यावत् वर्तत। अत्र सूर्यः सायम् ७-१८ समये मेषे आगतः। चन्द्रः अपि सायम् ४-३४ समये मकरे समागतः। अत्र सूर्यः बुधः शनिश्च चरराशिगाः सन्ति। चरतानमपि अस्ति। चन्द्रमा अपि चतुर्थे भावे चरराशिगः तत्क्षणात् आगमनयोगम् इति ग्रहाः निर्मान्ति। परन्तु न च वक्री यदा तदा अनेन नियमेन शनिः एकः अपि ग्रहः (शुक्रविबुधामन्दानाम् मध्ये) वक्री अस्ति। अतः पथिकागमने बाधा ज्ञेया।

## ५.८ पथिकागमनविचारे प्रश्नकुण्डल्याम् केन्द्रभावानाम् महत्त्वम्

प्रियपाठकाः यथा भवद्भिः पठितम् यत् केन्दस्थानात् द्वितीये गोचरवशात् आगमनशीलः ग्रहः पथिकागमनयोगनिर्माणे महत्त्वपूर्णा भूमिकां प्रकटीकरोति। अथ च समयसीमामपि निर्दिशति परन्तु **"विना सप्तमराशिगम्"** इत्युक्त्वा ग्रन्थकारेण केन्द्रभावेषु सप्तमभावस्य निषेधः कृतः। अस्मिन् विषये ग्रन्थकारः पुनः विचारम् कृत्वा केन्द्रस्थानाम् भावानाम् प्रथमचतुर्थसप्तमदशमानाम् पृथक् पृथक् भूमिकाम् निम्नश्लोकेन प्रकटीकरोति। तद् यथा –

**प्रश्नलग्नाच्च्युतिर्वाच्या वृद्धिस्तु सुखभावतः।**
**प्रवासो दशमस्थानान्निवृत्तिः सप्तमालयात्॥९॥**

**पदच्छेदः** – प्रश्नलग्नात्, च्युतिः, वाच्याः, वृद्धिः, तु, सुखभावतः, प्रवासः, दशमस्थानात्, निवृत्तिः, सप्तमालयात्।

**अन्वयः** – प्रश्नलग्नात् च्युतिः वाच्या सुखभावतः तु वृद्धिः दशमस्थानात् प्रवासः सप्तमालयात् निवृत्तिः।

**प्रतिपदार्थः** – प्रश्नलग्नात् = पथिकागमनविषये प्रश्नकर्तुः, समयाधारेण ज्ञात् प्रश्नलग्नात्, च्युतिः = स्वस्थानात् परिभ्रंशः, वाच्या = विचार्यते, कथनीयम् वा, सुखभावतः = चतुर्थस्थानात्, वृद्धिः = गृहसुखस्य वृद्धिः अथवा चतुर्थभावात् विचारणीयसुखगृहमित्राणाम् वृद्धिः वाच्येति शेषः दशमस्थानात् = केन्द्रेषु तृतीयकेन्द्रे दशमभावतः इत्यर्थः, प्रवासः = परदेशे वासः, विचार्यः इत्यर्थः, सप्तमालयात् = सप्तमकेन्द्रात्, निवृत्तिः = परदेशवासात्, निवृत्तिः निवर्तनम् वाच्येति सर्वत्र अन्वयः।

**विशिष्टार्थः** – केन्द्रभावेषु चत्वारः भावाः भवन्ति तत्र लग्नस्थानम् पथिकस्य प्रतिनिधिभूतम् स्थानम् भवति तेन पथिकस्य परदेशेगतस्य वा स्थानच्युतिः वाच्या। द्वितीयम् केन्द्रम् भवति चतुर्थस्थानम् तत् स्थानम् गृहे आगमनकारकगृहसुखस्य, मित्रबन्धुसखदीनाम् सुखस्य प्रतिनिधिवशात् वृद्धिकारकः भवति। तृतीयम् केन्द्रम् भवति सप्तमस्थानम् एतत् सप्तमस्थानम् मारकस्थाननाम्नापि ज्योतिष शास्त्रे प्रसिद्धम् अस्ति। अतः एतत् निवृत्तिकारकम् प्रवासान्निवर्तनम् व्यनक्ति। चतुर्थम् केन्द्रम् भवति दशमस्थानम् दशमस्थानम् केन्द्रेषु मूर्धन्यतमम् भवति। अतः एष भावः प्रवासः परदेशे वासस्य प्रमुखतमः भावः। प्रश्नविद्याप्रवीवेण एतत् सर्वम् मनसि निधाय तत्रस्थ ग्रहाणाम् शुभाशुभानाम् परीक्षणम् च कृत्वा तत्रस्थ चरस्थिर द्विस्वभावराशीनाम् च सम्यक् विचारम् कृत्वा पथिकागमनयोगः विचारणीयः।

### ५.८.१ चरस्थिरद्विस्वभावलग्नानाम् विषये विशेषः

पूर्वम् भवद्भिः पठितम् चराङ्गे चरभावेऽपि चन्द्रमा आगमनयोगकारकः।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



अत्र जिज्ञाया समुदेति यत् पथिकागमनयोगविचारे यदि स्थिरलग्नम्, द्विस्वभावलग्नम् वा भवेत् तदा किं फलम् वक्तव्य। अस्याः एव जिज्ञासायाः समाधानार्थम् निम्नश्लोकः निर्दिष्टः। तद् यथा –

**सत्त्वरं चरलग्ने तु स्थिरलग्ने न सम्भवः।**
**द्विस्वभावे विलम्बेन सदसदग्रहयोगतः॥१०॥**

**पदच्छेदः** – सत्त्वरम्, चरलग्ने, तु, स्थिरलग्ने, न, सम्भवः, द्विस्वभावे, विलम्बेन, सत्, असत्, ग्रहयोगतः।

**अन्वयः** – चरलग्ने सत्त्वरम्, स्थिरलग्ने तु न सम्भवः, द्विस्वभावे विलम्बेन सद्सद्ग्रहयोगतः।

**प्रतिपदार्थः** – चरलग्ने = मेष कर्कतुलामकरलग्ने, सत्त्वरम् = शीघ्रमेव पथिकागमनादि सम्भावना, स्थिरलग्ने = वृषसिंहवृश्चिककुम्भानाम् राशीनाम् लग्ने, तु, न, सम्भवः = पथिकगमनागमनादियोगेषु शीघ्रागमनादिकम् न भवतीत्यर्थः। द्विस्वभावे = मिथुनकन्याधनुमीनानाम् लग्ने, विलम्बेन = समयातिक्रमणेन चिकीर्षितसमयानन्तरमेव पथिकागमनादिकम् भवतीत्यर्थः, सदसद्ग्रहयोगतः = सत्ग्रहाः शुभग्रहाः, गुरुशुक्रबुधचन्द्राः, असद्ग्रहाः सूर्यभौमशनिराहुकेतवः एतेषाम् ग्रहाणाम् योगतः एतेषु ग्रहेषु शुभाशुभग्रहाणाम स्थितिवशात् विचार्य एव फलम् वक्तव्यमिति शेषः।

**विशिष्टार्थः** – चरलग्ने स्थिरलग्ने द्विस्वभावलग्ने वा सर्वत्र शुभाशुभग्रहाणाम् स्वामिग्रहाणाम् च सम्बन्धः विचारणीयः। यतो हि चरलग्ने स्वामिसौम्यानाम् युते दृष्टे वा सत्त्वरतायाम् बाधा भवेत्। स्थिरलग्ने पापयुतदृष्टे तु कदापि न सम्भवतः। गमनागमशाब्दिकम् सर्वत्र एव अस्य विचारः अपेक्षितः। द्विस्वभावलग्ने शुभग्रहाः किञ्चित् विलम्बकारकाः पापग्रहाः तु तत्र लग्ने अधिकविलग्नोत्पादकाः ज्ञेयाः। एतत् समस्तम् मनसि अवधार्य एव प्रश्नविद्या प्रवीणेन दैवज्ञेन पथिकागमनसम्बन्धे प्रश्नकुण्डलीद्वारा विचारः करणीयाः।

**बोधप्रश्नाः**

१७. ज्ञमन्दशब्देन किं तात्पर्यम् ?

१८. शुक्रज्ञरविमन्देषु को ग्रहः वक्री न भवति ?

१९. के चत्वारः ग्रहाः केषु राशिषु स्थिताः प्रवासीनां शीघ्रागमने हेतवः भवन्ति ?

२०. केन्द्रस्थानानि कानि ?

**मूलपाठः**

**प्रश्नतनोः सुखभे दशमे वा सौम्यखगो गमनं नहि गन्तुः।**
**तत्र गता यदि पाप नभोगाः आगमनं न वदन्ति महन्तः॥१॥**

**चतुर्थतो वा दशमात् द्वितीयेऽभ्येति खेचरः।**
**यावता तावता धीरः पथिकागमनं वदेत्॥२॥**

**प्रश्नकाले यदा केन्द्रात् द्वितीये तारकापतिः।**
**आयाति पथिकस्तत्र विना सप्तमराशिगम्॥३॥**



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



सप्तमस्थो यदा चन्द्रः पथिकः पथि वर्तते।
मार्गाधिके वा राश्यर्धात् परतो यदि संस्थितः॥४॥

चरार्द्धे चरभागेऽपि चतुर्थे यदि चन्द्रमा।
आयाति तत्क्षणादेव प्रवासी पत्रिकाऽपि च॥५॥

जीवो वा भार्गवो वाऽपि चन्द्रो वा सुखवेश्मनि।
पथिकं गृहमायान्तम् जानीयात् प्रश्नवित्तदा॥६॥

गुरुशुक्रौ द्वितीये वा तृतीये प्रश्नलग्नतः।
तथा गृहागतं विद्यात्पथिकं नात्रसंशयः॥७॥

शुक्रज्ञरविमन्दानामेकोऽपि चरराशिगः।
प्रवासी शीघ्रमायाति न च वक्री यदा तदा॥८॥

प्रश्नलग्नाच्च्युतिर्वाच्या वृद्धिस्तु सुखभावतः।
प्रवासो दशमस्थानान्निवृत्तिः सप्तमालयात्॥९॥

सत्त्वरं चरलग्ने तु स्थिरलग्ने न सम्भवः।
द्विस्वभावे विलम्बेन सदसद्ग्रहयोगतः॥१०॥

## ५.९ सारांशः

पाठेऽस्मिन् पथिकागमनयोगविचारे कदा गमनम् भवति, कदा च आगमनम् भवति कदा च अनयोः द्वयो गमनागमनयोः अभावः भवति इत्यारभ्य चतुर्थतो वा दशमात् द्वितीयभावे खेचरागमनेन गोचरवशात् पथिकागमनम् पठितम्। अत्र विशेषतः केन्द्रतो द्वितीये तारकापतेः (सप्तमकेन्द्रम् विहाय) आगमनेन पथिकागमनाम् पठितम्। कस्मिन् योगे पथिकः पथि वर्तते इति ज्ञानविधिः मार्गाधिपः (नवमेश) ग्रहः कः भवति इत्यपि ज्ञातम्। तत्क्षणात् पथिकागमनविचारे चरलग्ने चरनवांशे चतुर्थभावे चन्द्रागमनस्य महत्त्वम् अपि ज्ञातम्। गृहागतपथिकज्ञाने सुखवेश्मनि जीवस्य भार्गवस्य चन्द्रस्य च वैशिष्टयम् पठितम्। अस्मिन्नेव क्रमे गुरुशुक्रौ प्रश्नलग्नतः द्वितीये वा तृतीये भावे स्थितावपि **'गृहागतं पथिकं विद्यात्'** योगमिमम् कुरुतः इति अधीतम्। प्रवासीनाम् शीघ्रागमने शुक्रबुधसूर्यशनैश्चराः चरराशिगताः महत्त्वपूर्णाः, परन्तु एतेषु एकोऽपि वक्री शीघ्रागमने बाधकः भवति इत्यपि ज्ञातम्। केन्द्रभावेषु प्रथमः च्युतिकारकः, चतुर्थः वृद्धिकारकः, चरलग्ने सत्त्वरम्, स्थिरलग्ने असम्भवत्वम् द्विस्वभावे विलम्बेन भवति तत्रापि सदसद्ग्रहयोगस्य महत्वम् पठितम्।

## ५.१० शब्दावली

| | | | |
|---|---|---|---|
| १. | सुखभे | = | चतुर्थभावे। |
| २. | सौम्यखगः | = | शुभग्रहः। |
| ३. | पाप नभोगाः | = | पापग्रहाः। |
| ४. | महान्तः | = | श्रेष्ठज्योतिषिकाः। |
| ५. | अभ्येति | = | गच्छति। |
| ६. | खेचराः | = | ग्रहः। |
| ७. | तारकापतिः | = | चन्द्रमा। |



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



| | | | |
|---|---|---|---|
| ८. | मार्गाधिपः | = | नवमेशः। |
| ९. | राश्यर्धात्परतः | = | यस्य कस्यापि राशेः परार्धे स्थितः। |
| १०. | चराङ्गे | = | चरलग्ने। |
| ११. | चरभागे | = | चरनवांशे। |
| १२. | प्रवासी | = | विदेशस्थ जनः। |
| १३. | सुखवेश्मनि | = | चतुर्थगृहे। |
| १४. | जीवः | = | बृहस्पतिः। |
| १५. | भार्गवः | = | शुक्रः। |
| १६. | ज्ञः | = | बुधः। |
| १७. | मन्दः | = | शनिः। |
| १८. | वक्री | = | वक्रगतिकः ग्रहः। |
| १९. | च्युतिः | = | स्थानभ्रंशः। |
| २०. | सत्त्वरम् | = | शीघ्रता। |
| २१. | सत् | = | शुभग्रहः। |
| २२. | असत् | = | पापग्रहः। |

## ५.११ सन्दर्भग्रन्थः

१. प्रश्नभूषणम् (दैवज्ञजीवनाथझा), आचार्यः गुहप्रसादगौड़ः, चौखम्भासुरभारती-प्रकाशनम्, वाराणसी।

## ५.१२ सहायकग्रन्थाः

१. **प्रश्नवैष्णवः**, पं. श्रीउमाकान्त झाः, नागप्रकाशक, यू.ए. जवाहरनगर, दिल्ली।

२. **भुवनदीपकम् ( विज्ञानभाष्य )**, शुकदेवचतुर्वेदी, रंजनपब्लिकेशन अंसारी रोड दरियागंज, नई दिल्ली।

३. **षट्पञ्चाशिका,** डॉ. सत्येन्द्रमिश्रः, चौखम्भासंस्कृतसंस्थानम्, वाराणसी।

४. **ताजिकनीलकण्ठी,** डॉ. शिवप्रसादशर्मा, आचार्य श्रीनिवासशर्मा, भारतीय-विद्याप्रकाशनम्, दिल्ली।

५. **भुवनदीपकम्** संस्कृतभाष्यम्, लेखकः-प्रो. वासुदेवशर्मा, राष्ट्रिय संस्कृत संस्थानम् जयपुरपरिसरः, जयपुरम्।

## ५.१३ बोधप्रश्नोत्तराणि

१. प्रश्नतनोः सुखभे दशमे वा सौम्यखगो गमनं न हि गन्तु।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



२. तत्र गताः यदि पापनभोगाः आगमनं न वदन्ति महान्तः।

३. चतुर्थदशमस्थाः शुभग्रहाः चतुर्थदशमौ भावौ।

४. चतुर्थे दशमे स्थिताः पाप नभोगाः।

५. गमनाभावे सुखभे वा दशमे च एकः सौम्यखगः, आगमनाभावे उभयत्र पापग्रहाः बहवः अपेक्षिताः।

६. एकमासे।

७. चतुर्थतो वा दशमात् द्वितीये भावे।

८. सप्तमभावे।

९. प्रथम चतुर्थदशमे।

१०. गुरुशुक्रौ द्वितीये तृतीये चतुर्थे वा आगमनयोगे कारकौ भवतः।

११. चराङ्गे चरभागेऽपि चतुर्थे यदि चन्द्रमा तत्क्षणादेव प्रवासी पत्रिकाऽपि च आयाति।

१२. मेष कर्कतुलामकरलग्नानि।

१३. चरराशिषु (मेषकर्कतुलामकरेषु)।

१४. द्वितीयतृतीयचतुर्थभावेषु।

१५. चरनवांशः।

१६. चराङ्गे चरभागेऽपि चतुर्थे यदि चन्द्रमाः आयाति तत्क्षणादेव प्रवासी पत्रिकाऽपि च।

१७. बुधशनी।

१८. सूर्यः।

१९. शुक्रबुधसूर्यशनयः मेषकर्कतुलामकरस्थाः।

२०. १-४-७-१० (प्रथमचतुर्थसप्तमदशमाः)।

## ५.१४ अभ्यासप्रश्नाः

१. चरनवांशे चतुर्थस्थ चन्द्रद्वारा तत्क्षणात् - आगमनयोगोदाहरणं प्रदर्श्यताम्।

२. पथिकस्य मार्गे स्थितिद्योतकोदाहरणम् द्वयम् प्रदर्श्यताम्।

३. 'विना सप्तमराशिगम्' अस्य आशयः स्पष्टीक्रियताम्।

४. 'राश्यर्धात्परतो मार्गाधिपः कथं स्थितः' उदाहरणद्वारा प्रदर्श्यताम्।

५. 'द्विस्वभावे विलम्बने सदसद्-ग्रहयोगतः' अस्योदाहरणम् प्रदर्श्यताम्।

—•—



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



# षष्ठः पाठः - पथिकप्रश्नविचारः

## पाठसंरचना

६.१ प्रस्तावना
६.२ उद्देश्यम्
६.३ पथिकस्य अनिष्टज्ञानम्
६.३.१ पथिकस्य मृत्युयोगः
६.३.२ पथिकस्य कष्टयोगः
६.३.३ पथिके चौरभयम्
६.३.४ पथिके शस्त्रभयम्
बोधप्रश्नाः
६.४ पथिकस्य सधनागमयोगः
६.५ चर-स्थिर-द्विस्वभावलग्नात् गमागमप्रश्ने विशेषः
६.६ पथिकागमनकालज्ञानम्
बोधप्रश्नाः
मूलपाठः
6.7 सारांशः
6.8 शब्दावली
6.9 सन्दर्भग्रन्थः
6.10 सहायकग्रन्थाः
6.11 बोधप्रश्नोत्तराणि
6.12 अभ्यासप्रश्नाः

## ६.१ प्रस्तावना

प्रियच्छात्रः गते पाठे भवता पथिकस्य गमागमनविषयाः पठिताः। तत्र ग्रहाणां गोचरवशात् पथिकस्य आगमनकालाः पठिताः। अस्मिन् पाठे प्रश्नकुण्डल्याः गतस्य पथिकस्य मार्गे अनिष्टादिकं ज्ञानार्थं विषयाः निरूप्यन्ते। चतुर्थे पाठ्यांशे पथिकस्य सधनागमयोगः निरूप्यते। तदनु पञ्चमे पाठ्यांशे प्रश्नकाले चर-स्थिर-द्विस्वभावलग्नत्वात् पथिकागमने प्रश्ननिराकरणविधिः प्रस्तूयते। तत्र अन्येषामपि प्रश्नानाम् उत्तरज्ञाने चर-स्थिर-द्विस्वभावलग्नात् ज्ञानार्थं विषयाः निरूप्यन्ते। ततः अन्ते षष्ठे पाठ्यांशे गमनागमनस्य कालज्ञानार्थं नियमः प्रस्तूयते। एवं पाठोऽयं गमागमनसम्बन्धिप्रश्ने पथिकस्य स्थितिज्ञानार्थम् उपयुक्तो वर्तते।

## ६.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् -

- प्रश्नकुण्डल्या पथिकः कष्टेन युक्तः, मृतः अस्ति वा इति ज्ञातुं शक्ष्यति।
- पथिकः चौराद्भीतः वा। यदि स्यात्तर्हि कति चौरेभ्यः इति ज्ञातुं शक्ष्यति।
- पथिकः धनयुक्तः आगमिष्यति न वेति ज्ञातुं शक्ष्यति।
- पथिकस्य आगमनकालं ज्ञातुं शक्ष्यति।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



## ६.३ पथिकस्य अनिष्टज्ञानम्

यदि कश्चिद् पथिकः (यात्री) यात्रायां गतः स्यात्। तदा तस्य परिजनः यदि दैवज्ञं पृच्छति यत् गतः पथिकः कुशली न वा इति। तदा दैवज्ञः प्रश्नकुण्डल्यां पथिकस्य शुभत्वाशुभत्वविचारं कुर्यात्। प्रश्नकुण्डल्यां लग्नात् षष्ठमात् सप्तमात् अष्टमाच्च भावात् प्रायः पथिकस्य अनिष्टादिकस्य विचारः क्रियते। पथिकानिष्टे सामान्यतः पथिकस्य मृत्युः रोगादिना कष्टम्, व्यापारवस्तूनां चौराद्भयम्, शस्त्रभयादिकं च विचार्यते।

### ६.३.१ पथिकस्य मृत्युयोगः

पथिकप्रश्ने यदि अष्टमेशेन युक्तः चन्द्रः लग्नेशश्च षष्ठे अथवा सप्तमे भावे स्थितः तदा पथिकस्य मृत्युः भवेत्। इति ज्ञातव्यम्। प्रश्नभूषणे उक्तं वर्तते –

**शशाङ्कलग्नपौ षष्ठे सप्तमे वा युतौ यदि।**
**अष्टमेशेन कुरुतो मरणं पथिकस्य वै॥**

**पदविच्छेदः** – शशाङ्कः, लग्नपौ, षष्ठे, सप्तमे, वा, युतौ, यदि, अष्टमेशेन, कुरुतः, मरणं पथिकस्य, वै।

**पदान्वयः** – शशाङ्कलग्नपौ यदि षष्ठे वा सप्तमे अष्टमेशेन युतौ (तदा) पथिकस्य वै मरणं कुरुतः।

**प्रतिपदार्थः** – शशाङ्कलग्नपौ = चन्द्रलग्नेशौ, यदि षष्ठे = षष्ठे भावे, वा = अथवा, सप्तमे = सप्तमे भावे, अष्टमेशेन = अष्टमभावस्य स्वामिना, युतौ = युक्तौ, तदा, पथिकस्य = यात्रिणः, वै = निश्चयेन, मरणं कुरुतः = मृत्युप्रदौ भवतः।

**सरलार्थः** – पथिकप्रश्नकाले यदि चन्द्रलग्नेशौ षष्ठे अथवा सप्तमे भावे अष्टमेशेन युतौ स्यातां तदा ग्रहौ एतौ पथिकस्य निश्चयेन मरणं कुरुतः। मृत्युसूचकौ भवत इति भावः।

यथा परिजनः कदाचित् पथिकस्य क्षेमप्रश्नं कुर्यात् तदा सिंहलग्नः स्यात् तर्हिः अष्टमभावे मीनराशिः अष्टमेशश्च गुरुः भवति। स च गुरुः लग्नेशेन सूर्येण सह चन्द्रेणापि षष्ठे अथवा सप्तमे भावे स्थितः तदा दैवज्ञः पथिकस्य मृत्योः आशङ्का वदेत्।







एवमेवान्यत्रापि ज्ञातव्यम्।

**ध्यातव्यम्** - मृत्युविषये अत्र केचन विद्वांसः भिन्नमतमपि निर्दिशन्ति। तेषां मते मृत्युशब्देन प्राणनाशः न अपितु अष्टवित्सु मृत्युभेदेषु किमपि भवतुं शक्नोति इति ज्ञातव्यम्। ते अष्टविधं मृत्युम् एवं वदन्ति –



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**व्यथादुःखं भयं लज्जा रोगः शोकस्तथैव च।**
**मरणं चापमानं च मृत्युरष्टविधः स्मृतः॥**

अर्थात् – (1) व्यथा (2) दुःखम् (33) भयम् (4) लज्जा (5) रोगः (6) शोकः (7) मरणं प्राणनाशः (8) अपमानम्। एते अष्टमृत्युभेदाः भवन्ति।

### ६.३.२ पथिकस्य कष्टयोगः

पथिकप्रश्ने यदि पृष्ठोदयराशिषु (मेष-वृष-कर्क-धनुराशिषु) कश्चित् राशिः लग्ने स्यात् तथा पापग्रहेण दृष्टः लग्नः शुभग्रहेण न दृष्टः तथा पथिकस्य कष्टं ज्ञातव्यम्। तद्यथा –

**पृष्ठोदये यदा लग्ने सौम्यादृष्टे खलेक्षिते।**
**प्रवासी दुःखसन्तप्तः पापैर्वा केन्द्रगैरपि॥**

**पदविच्छेदः** – पृष्ठोदये, यदा, लग्ने, सौम्यादृष्टे, खलेक्षिते, प्रवासी, दुःखसन्तप्तः, पापैः, वा, केन्द्रगैः, अपि।

**पदान्वयः** – यदा पृष्ठोदये लग्ने सौम्यादृष्टे खलेक्षिते प्रवासी दुःखसन्तप्तः (भवति), वा केन्द्रगैः पापैः अपि।

**प्रतिपदार्थः** – यदा, पृष्ठोदये लग्ने = पृष्ठोदयराशेः लग्ने स्थिते, सौम्यादृष्टे = शुभग्रहेण न दृष्टे, खलेक्षिते = अशुभग्रहेण-दृष्टे, प्रवासी = पथिकः (यात्री) दुःखसन्तप्तः = कष्टयुक्तः, भवति, वा = अथवा, केन्द्रगैः = केन्द्रभावेषु गतैः, पापैः = पापग्रहैः, अपि।

**सरलार्थः** – पथिकप्रश्ने यदि पृष्ठोदयराशेः लग्ने स्थिते तथा लग्ने अशुभग्रहेण दृष्टे, शुभग्रहेण न दृष्टे तदा पथिकः कष्टयुक्तः स्यादिति दैवज्ञः जानीयात्। पुनश्च यदि प्रश्नकाले केन्द्रभावेषु पापग्रहाः स्युः तदापि पथिकः कष्टयुक्तः स्यात्।

यथा– ह्यस्यां कुण्डल्यां - मेषलग्नं वर्तते तदुपरि भौमस्य शनेश्च दृष्टिः अस्ति। अतः अस्यां परिस्थितौ प्रश्नात् दैवज्ञः पथिकं कष्टयुक्त इति वदेत्।




एवमेव अन्यत्रापि ज्ञातव्यम्।

### ६.३.३ पथिके चौरभयज्ञानम्

पथिकक्षेमप्रश्ने यदि प्रश्नलग्नादष्टमे सूर्यः भौमो वा स्यात्तदा पथिकं चौरभयं भवति इति ज्ञातव्यम्। तत्र चाष्टमभावे सूर्येण भौमेन वा यावन्तः ग्रहाः युक्ताः तावद्भ्यः चौरेभ्यः भयं भवति। यथोक्तं प्रश्नभूषणे–



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**सूर्येऽष्टमे कुजे वाऽपि पथि चौरभयं वदेत्।**
**यावन्तो निधने खेटाश्चौरास्तत्संख्यकाः स्मृताः॥**

**पदविच्छेदः** – सूर्ये, अष्टमे, कुजे, वा, अपि, पथि, चौरभयम्, वदेत्, यावन्तः, निधने, खेटाः, चौराः, तत्संख्यकाः, स्मृताः।

**पदान्वयः** – सूर्ये वा कुजे अष्टमे सति पथि चौरभयं वदेत्। निधने यावन्तः खेटाः (स्युः) तत्संख्यकाः चौराः स्मृताः।

**प्रतिपदार्थः** – सूर्ये = सूर्यग्रहे, वा = अथवा, कुजे = भौमे, अष्टमे = अष्टमभावे, सति पथि = मार्गे, चौरभयं, वदेत् = दैवज्ञः वदेत्। निधने = अष्टमभावे, यावन्तः खेटाः = यावन्तः ग्रहाः, (स्युः) तत्संख्यकाः = तावन्तः संख्यकाः, चौराः, स्मृताः = ज्ञातव्याः।

**सरलार्थः** – प्रश्नकाले सूर्ये अथवा भौमे अष्टमभावसंस्थिते सति मार्गे (यात्रायां) चौरभयं ज्ञातव्यम्। तत्र च यावन्तः खेटाः अष्टमे भावे स्युः तत्संख्यकेभ्यः चौरेभ्यः कष्टं भवति।

### ६.३.४ पथिके शस्त्रभयम्

पथिकसम्बन्धिप्रश्नकाले यदि अष्टमे भावे सिंहराशौ गतः सूर्यः चन्द्रः अथवा भौमः शनिना दृष्टः स्यात्तदा मार्गे पथिकं शस्त्रभयम् इति ज्ञातव्यम्। उक्तं हि प्रश्नभूषणे –

**सिंहे रविः शशी भौमो निधने शनिनेक्षितः।**
**शस्त्रकोपं वदेत्तत्र यदि लग्ने शुभो न हि॥**

**पदविच्छेदः** – सिंहे, रविः, शशी, भौमः, निधने, शनिना, ईक्षितः, शस्त्रकोपं, वदेत्, तत्र, यदि, लग्ने, शुभः, न हि।

**पदान्वयः** – रविः शशी भौमः (वा) सिंहे निधने शनिना ईक्षितः तत्र शस्त्रकोपं वदेत् हि, लग्ने शुभः न।

**प्रतिपदार्थः** – रविः = सूर्यः, शशी = चन्द्रः, भौमः, वा, सिंहे = सिंहराशौ, निधने = अष्टमे भावे, शनिना = शनिग्रहेण, ईक्षितः = दृष्टः, तत्र = तस्मिन् काले प्रश्नात्, शस्त्रकोपं = शस्त्रेण भयं, वदेत् = दैवज्ञः वदेत्, हि, लग्ने = प्रथमभावे, शुभः = शुभग्रहः, न = न स्यात्।

**सरलार्थः** – प्रश्नकाले यदि सूर्यः चन्द्रः अथवा भौमः अष्टमे स्थितः शनिना दृष्टः पुनः लग्ने शुभग्रहः न स्यात्, तदा पथिकं शस्त्रभयं दैवज्ञः वदेत्।

यथा ह्यस्यां कुण्डल्याम् –



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri






एवमेव अन्यत्रापि ज्ञातव्यम्।

**बोधप्रश्नाः**

१. पथिकस्य अनिष्टादिकं कस्मात् – कस्मात् भावात् विचार्यते ?

२. पथिकप्रश्ने अष्टमेशेन युक्तः चन्द्रः लग्नेशश्च षष्ठे अथवा सप्तमे भावे स्यात् तदा किम्फलं भवति ?

३. मृत्युः कतिविधः विद्वद्भिः उक्तः ?

४. सूर्यः भौमो वा कस्मिन् भावे गत्वा चौरभयं ददाति ?

## ६.४ पथिकस्य सधनागमयोगः

पथिकागमनसम्बन्धिप्रश्नकाले यदि दशमभावः अथवा नवमभावः शुभग्रहेण युक्तः स्यात्तदा दैवज्ञः सधनः पथिकः आगमिष्यति इति वदेत्। आचार्येण श्रीमज्जीवनाथेन प्रश्नभूषणे उक्तम् –

**दशमे शुभसंयुक्ते नवमे वा विशेषतः।**
**अर्थपूर्णः समायाति पथिको नात्र संशयः॥**

**पदविच्छेदः** – दशमे, शुभसंयुक्ते, नवमे, वा, विशेषतः, अर्थपूर्णः, समायाति, पथिकः, न, अत्र, संशयः॥

**पदान्वयः** – दशमे वा नवमे शुभसंयुक्ते पथिकः विशेषतः अर्थपूर्णः समायाति, अत्र न संशयः।

**प्रतिपदार्थः** – दशमे = दशमभावे, वा = अथवा, नवमे = नवमभावे, शुभसंयुक्ते = शुभग्रहेण युक्ते, पथिकः = यात्री, विशेषतः = विशेषरूपेण, अर्थपूर्णः = धनयुक्तः, समायाति = गृहमागच्छति। अत्र = अस्मिन् सन्दर्भे, न, संशयः = कश्चिद् संशयः न।

**सरलार्थः** – पथिकागमनसम्बन्धिप्रश्ने दशमभावे अथवा नवमे भावे शुभग्रहेण युक्ते सति पथिकः विशेषरूपेण धनयुक्तः समागमिष्यति इति दैवज्ञः वदेत्। अत्र किमपि संशयः न कर्त्तव्य इति।

## ६.५ चर-स्थर-द्विस्वभावलग्नात् गमागमप्रश्ने विशेषः

पथिकागमनप्रश्ने यदि स्थिरलग्नः (लग्ने वृष-सिंह-वृश्चिक-कुम्भेषु कश्चिदेकः) स्यात्तदा, गमनसम्बन्धिप्रश्ने यात्रागमनः न भविष्यति, आगमनप्रश्ने पथिकागमनं न भविष्यति



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



इति ज्ञातव्यम्। तथैव प्रश्नकाले चरलग्ने (मेष-कर्क-तुला-मकरराशिष्वन्यतमे) सति गमनप्रश्ने यात्रा भविष्यति, आगमनप्रश्ने पथिकः आगमिष्यति इति ज्ञातव्यम्। द्विस्वभावे लग्ने (मिथुन-कन्या-धनु-मीनेष्वन्यतमे) संशयः भवति गमनागमनं भवितुं शक्नोति नापि वा।

विशेषः - उक्तविषयाः चन्द्रस्थिरराशितोऽपि ज्ञातव्याः इति। यथोक्तं प्रश्नभूषणे-

**प्रश्नकाले स्थिरे लग्ने स्यातां नैव गमागमौ।**
**न मृतं न च नष्टं हि न रोगो न पराजयः॥**

**पदविच्छेदः** – प्रश्नकाले, स्थिरे, लग्ने, स्यातां, नैव, गमागमौ, न, मृतं, न, च, नष्टं, हि, न, रोगः, न, पराजयः।

**पदान्वयः** – प्रश्नकाले स्थिरे लग्ने गमागमौ नैव स्याताम्। न मृतं, न नष्टं, न रोगः न च पराजयः (वाच्यः)।

**प्रतिपदार्थः** – प्रश्नकाले, स्थिरे लग्ने = स्थिरराशौ लग्ने स्थिते, गमागमौ = गमागमप्रश्ने सति गमनम् अथवा आगमनं, नैव स्याताम्, न मृतं = मृत्युप्रश्ने मृत्युः न, भविष्यति। न नष्टं = नष्टद्रव्यप्रश्ने वस्तुः न नष्टः इति, न रोगः = रोगप्रश्नेः न रोगः, न च पराजयः = पराजयः भविष्यति न वेति प्रश्ने न पराजयः भविष्यति इति वाच्यः = वक्तव्यः।

**सरलार्थः** – यदि प्रश्नकाले स्थिरलग्नः स्यात् तदा गमागमनप्रश्ने, मृत्युप्रश्ने, नष्टद्रव्यप्रश्ने, रोगप्रश्ने तथा जय-पराजयादिप्रश्ने नकारात्मकं फलं भवति। इति दैवज्ञेन ज्ञातव्यम्।

**ध्यातव्यम्** –

- अमुकयात्री अथवा अहम् गमिष्यामि न वेति प्रश्ने स्थिरलग्ने सति ''न'' इति ज्ञातव्यम्।
- गतः पथिकः शीघ्रम् आगमिष्यति न वेति प्रश्ने स्थिरलग्ने सति ''नागमिष्यति'' इति ज्ञातव्यम्।
- अमुकः रोगी अस्ति सः मरिष्यति न वेति प्रश्ने स्थिरलग्ने सति ''न मरिष्यति'' इति आदिश्यम्।
- कश्चिद्रोगी स्वकीये मरणविषये पृच्छति तदा स्थिरलग्ने सति ''न मरिष्यति'' इति आदिश्यम्।
- कश्चिद् पृच्छकः अमुकवस्तु नष्ट चौरितम/ वा? इति पृच्छति तदा स्थिरलग्नत्वात् ''न नष्टः'' इति वक्तव्यः।
- अमुकनष्टवस्तु मिलिष्यति न वा इति प्रश्ने स्थिरलग्ने सति ''न मिलिष्यति'' इति वक्तव्यः।
- कश्चित् परिजनः सम्बन्धितरोगिविषये पृच्छति यत् रोगान्निवृत्तिः भविष्यति न वा तदा स्थिरलग्नत्वात् ''न निवृत्तिः'' इति निर्देश्यम्।
- प्राप्ते युद्धकाले पराजयाशङ्कितः प्रश्नं करोति तदा पराजयः न भविष्यति इति आदेश्यम्।

पुनश्च –



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**तद्वत्यत्ययं चरे लग्ने द्विःस्वभावे तु मिश्रिता।**
**शुभदृष्ट्या शुभं ज्ञेयं चन्द्राद्वा व्यत्ययेऽन्यथा॥**

**पदविच्छेदः** – तद्वत्यत्ययं, चरे, लग्ने, द्विःस्वभावे, तु, मिश्रता, शुभदृष्ट्या, शुभं, ज्ञेयं, चन्द्रात्, वा, व्यत्यये, अन्यथा।

**पदान्वयः** – चरे लग्ने तद्वत्यत्ययं द्विस्वभावे तु मिश्रता (पुनः) शुभदृष्ट्या शुभं व्यत्यये अन्यथा ज्ञेयं चन्द्राद्वा।

**प्रतिपदार्थः** – चरे लग्ने = लग्ने चरराशिस्थिते, तद्वत्यत्ययं = उक्तफलाद्विपरीतं, द्विस्वभावे तु = लग्ने द्विस्वभावराशौ तु, मिश्रता = चर/स्थिरलग्नफलस्य मिश्रफलं, (पुनः) शुभदृष्ट्या = शुभग्रहेण दृष्टत्वात्, शुभं = शुभफलं, व्यत्यये = शुभात् विपरीतेन, अशुभग्रहेण दृष्टत्वात्, अन्यथा = विपरीतफलं (अशुभफलं), ज्ञेयम् = ज्ञातव्यम्। चन्द्राद्वा = उक्तविषयाः चन्द्रराशितोऽपि ज्ञायन्ते।

**सरलार्थः** – प्रश्नकाले चरलग्ने सति पूर्वोक्तविषयाणां स्थिरराशिफलाद्विपरीतं फलं भवति। अर्थात् गमनप्रश्ने गमनम्, आगमनप्रश्ने आगमनम्, मृत्युप्रश्ने मृत्युः, वस्तुनष्टप्रश्ने नष्टः, रोगनिवृत्तिप्रश्ने निवृत्तिः तथा पराजयप्रश्ने पराजयः वक्तव्य इति।

तत्रापि शुभग्रहेण दृष्टे शुभं तथा अशुभग्रहेण-दृष्टे अशुभं फलं भवति इति प्रश्नभूषणकारस्य मतम्।

– उक्तप्रश्नानां शुभाशुभविचारः लग्नमिव चन्द्रराशितोऽपि ज्ञायते।

## ६.६ पथिकागमनकालज्ञानम्

पथिकागमनप्रश्ने अथवा यात्रागमनप्रश्ने कदा गमनागमनं भविष्यति इत्यस्य निर्धारणार्थम्। गमनागमनस्य यः ग्रहः कारकः भवति, सः प्रश्नलग्नात् यावत्तुल्यसंख्ये भावे स्थितः। तत्तुल्यसंख्यायां द्वादशभिः संगुण्य गुणनफलतुल्यदिनान्तरालेन गमनागमनं ज्ञातव्यम्। अयमेव प्रश्नभूषणे निर्दिश्यते आचार्येण जीवनाथेन। तद्यथा –

**लग्नाद्यत्प्रमिते खेटस्तेन द्वादशसङ्गुणा।**
**तैरेव दिवसैर्ज्ञेयं तदागमनमादिभिः॥**

**पदविच्छेदः** – लग्नात्, यत्, प्रमिते, खेटः, तेन, द्वादशसंगुणा, तैः, एव, दिवसैः, ज्ञेयं, तदागमनम्, आदिभिः॥

**पदान्वयः** – लग्नात् यत्प्रमिते खेटः तेन द्वादशसङ्गुणा तैरेव दिवसैः तदागमनमादिभिः ज्ञेयम्।

**प्रतिपदार्थः** – लग्नात् = प्रश्नलग्नात्, यत्प्रमिते = यावत्संख्यके भावे, खेटः = गमनादिकारकः ग्रहः, तेन = तयासंख्यया, द्वादशसंगुणा = द्वादशसंख्यागुणिता, (तदा) तैरेवदिवसैः = गुणनफलतुल्यदिवसैः, तदागमनमादिभिः = गमनागमनादिकार्यैः ज्ञेयम्।

**सरलार्थः** – प्रश्नलग्नात् यावत्तुल्यभावे गमनागमनादिकारकग्रहः स्यात् तत्तुल्यसंख्याभिः द्वादशसंख्यासङ्गुणनेन यद्गुणनफलमायाति तत्संख्यातुल्यदिवसैः गमनागमनादिकं भवति इति ज्ञातव्यम्। सूत्ररूपेण निरुप्यते चेत् –

12 X (गमनागमनकारकग्रहराशिः - लग्नराशिः + 1) = गमनागमनदिवसः।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**बोधप्रश्नाः**

५. पथिकागमनप्रश्नकाले शुभग्रहयुतस्य नवमभावस्य किं फलम् ?

६. यात्रागमनं भविष्यति न वा इत्यस्मिन् प्रश्नकाले स्थिरलग्नत्वात् किम् आदेश्यम्?

७. रोगनिवृत्तिप्रश्ने स्थिरलग्ने सति किं ज्ञातव्यम् ?

८. पराजयाशंकिते प्रश्नकाले चरलग्नेन किं ज्ञातव्यम् ?

९. गमनागमनदिवसज्ञानार्थं सूत्रं लिखत।

**मूलपाठः**

**शशाङ्कलग्नपौ षष्ठे सप्तमे वा युतौ यदि।**
**अष्टमेशेन कुरुतो मरणं पथिकस्य वै॥**

**पृष्ठोदये यदा लग्ने सौम्यादृष्टे खलेक्षिते।**
**प्रवासी दुःखसन्तप्तः पापैर्वा केन्द्रगैरपि॥**

**सूर्येऽष्टमे कुजे वाऽपि पथि चौरभयं वदेत्।**
**यावन्तो निधने खेटाश्चौरास्तत्संख्यकाः स्मृताः॥**

**सिंहे रविः शशी भौमो निधने शनिनेक्षितः।**
**शस्त्रकोपं वदेत्तत्र यदि लग्ने शुभो न हि॥**

**दशमे शुभसंयुक्ते नवमे वा विशेषतः।**
**अर्थपूर्णः समायाति पथिको नात्र संशयः॥**

**प्रश्नकाले स्थिरे लग्ने स्यातां नैव गमागमौ।**
**न मृतं न च नष्टं हि न रोगो न पराजयः॥**

**तद्व्यत्ययं चरे लग्ने द्विःस्वभावे तु मिश्रिता।**
**शुभदृष्ट्या शुभं ज्ञेयं चन्द्राद्वा व्यत्ययेऽन्यथा॥**

**लग्नाद्यत्प्रमिते खेटस्तेन द्वादशसङ्गुणा।**
**तैरेव दिवसैर्ज्ञेयं तदागमनमादिभिः॥**

## ६.७ सारांशः

प्रियच्छात्रः! भवता प्रश्नभूषणाख्यग्रन्थाधारिते अस्मिन् षष्ठे पाठे गतस्य पथिकस्य कुशल-क्षेमादिप्रश्नानां सम्यग्ज्ञानार्थं विषयाः अधीताः। अस्मिन् पाठे आदौ प्रश्नकुण्डल्या गतस्य पथिकस्य अनिष्टादिविचारकयोगाः निरूपिताः -

यदि प्रश्नकाले अष्टमेशेन युक्तः चन्द्रः लग्नेशश्च सप्तमे भावे स्यात्तदा पथिकस्य मरणं, मृत्युतुल्यकष्टं वा ज्ञातव्यम्। यदि प्रश्नकाले लग्ने पृष्ठोदयराशिः स्यात् तथा लग्नोपरि पापग्रहाणां दृष्टिः स्यात्तदा पथिकाय कष्टः भवति। यदि प्रश्नलग्नादष्टमे सूर्यः भौमो वा स्यात्तदा पथिकाय चौरभयं भवति। तत्रापि सूर्यकुजयोः स्थित्यां सति यावन्तः ग्रहाः अष्टमे भावे स्युः तावद्भ्यः चौरेभ्यः कष्टं ज्ञातव्यम्। प्रश्नकाले सिंहराशिगते अष्टमभावे सूर्ये चन्द्रे अथवा भौमे शनिना दृष्टे सति पथिकं शस्त्रभयमिति दैवज्ञेन ज्ञातव्यम्। अनेन प्रकारेण पथिकस्य अनिष्टादिकं निरूप्य। पुनः पथिकस्य आगमनयोगाः निरूपिताः। पथिकागमनप्रश्नकाले



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पथिकगमनागमनादिप्रश्नानां विचारणम्

प्रश्नकुण्डल्यां दशमभावः अथवा नवमभावः शुभग्रहेण युक्तः स्यात्तदा सधनं पथिकागमनं भवेत्। पुनः पथिकागमनप्रश्ने चरलग्ने सति आगमनं स्थिरलग्ने अनागमनं तथा द्विस्वभावे संशयः इति दैवज्ञः निर्दिशेत्। तत्र निरुपितं यत् –

**प्रश्नकाले स्थिरे लग्ने स्यातां नैव गमागमौ।**
**न मृतं न च नष्टं हि न रोगो न पराजयः॥**

**तद्व्यत्ययं चरे लग्ने द्विस्वभावे तु मिश्रता।**
**शुभदृष्ट्या-शुभं ज्ञेयं चन्द्राद्वा व्ययत्ययेऽन्यथा॥**

तदनु-पथिकस्य गमनागमनप्रश्ने पथिकस्य आगमनकालज्ञानार्थं सूत्रं निर्दिष्टम्। तदनुसारं प्रश्नलग्नात् गमनागमनकारकः ग्रहः यस्मिन् भावे स्यात्, तद्भावसंख्याभिः द्वादशसंख्या संगुण्यते तदा गुणनफलतुल्यदिवसे गमनागमनं भवति इति निर्दिष्टम्। एवम्प्रकारेण पाठेऽस्मिन् पथिकस्य अनिष्टादिकं तथा पथिकागमनकालज्ञानार्थं विषयाः सुव्यवस्थिताः निरूपिताः आसन् इति शेषः।

## ६.८ शब्दावली

| | | | |
|---|---|---|---|
| १. | परिजनः | = | अभिभावकः। |
| २. | दैवज्ञः | = | ज्योतिषी। |
| ३. | पथिकः | = | यात्री। |
| ४. | पथि | = | मार्गे। |
| ५. | सधनः | = | धनयुक्तः। |
| ६. | खेटः | = | ग्रहः। |
| ७. | रोगनिवृत्तिः | = | रोगात् मुक्तिः, स्वास्थ्यलाभः। |

## ६.९ सन्दर्भग्रन्थः

१. प्रश्नभूषणम् (दैवज्ञजीवननाथझा),आचार्यः गुरुप्रसादगौड़ः, चौखम्भासुरभारती-प्रकाशनम्, वाराणसी।

## ६.१० सहायकग्रन्थाः

१. **प्रश्नवैष्णवः**, पं. श्रीउमाकान्तझाः, नागप्रकाशकः, यू.ए. जवाहरनगर, दिल्ली।

२. **भुवनदीपकम् ( विज्ञानभाष्य )**, शुकदेवचतुर्वेदी, रंजनपब्लिकेशन अंसारी रोड दरियागंज, नई दिल्ली।

३. **षट्पञ्चाशिका**, डॉ. सत्येन्द्रमिश्रः, चौखम्भासंस्कृतसंस्थानम्, वाराणसी।

४. **ताजिकनीलकण्ठी**, डॉ. शिवप्रसादशर्मा, आचार्यश्रीनिवासशर्मा, भारतीय-विद्याप्रकाशनम्, दिल्ली

५. **भुवदीपकम्**, संस्कृतभाष्यम्, ले.- प्रो. वासुदेवशर्मा, राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसरः, जयपुरम्।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



## ६.११ बोधप्रश्नोत्तराणि

१. लग्नात् षष्ठात् सप्तमात् अष्टमात् च भावात्।

२. पथिकस्य मृत्युः।

३. अष्टविधः।

४. अष्टमे भावे।

५. पथिकस्य सधनागमः भवति।

६. न भविष्यति।

७. रोगनिवृत्तिः न इति।

८. पराजयः भवति।

९. १२ (गमनागमनकारक ग्रहराशिः - लग्नराशिः + १) = गमनागमनदिवसः।

## ६.१२ अभ्यासप्रश्नाः

१. प्रश्नकाले केन योगेन पथिकस्य मार्गे कष्टं ज्ञातव्यम्।

२. पथिकस्य सधनागमयोगः निरूपणीयः।

३. पथिकागमनकालं कथं ज्ञायते ? निर्दिष्टताम्।

—•—



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



# सप्तमः पाठः - नौकाप्रश्नः

## पाठसंरचना

७.१ प्रस्तावना
७.२ उद्देश्यम्
७.३ नौकाप्रश्नाः
७.३.१ नौकाप्रश्ने विचारणीयः भावः
बोधप्रश्नाः
७.४ नौकाप्रश्ने शुभयोगः
७.५ नौकाप्रश्ने उत्पातयोगः
७.५.१ अरिवह्निकृदुत्पातयोगः
७.५.२ जलनिमग्नयोगः
७.६ नौकापतेरनिष्टकरयोगः
बोधप्रश्नाः
७.७ नौकाप्रश्ने लाभकरयोगः
७.८ नौकाप्रश्ने विशेषलाभकरयोगः
७.९ नौकाप्रश्ने अलाभकरयोगः
बोधप्रश्नाः
मूलपाठः
७.१० सारांशः
७.११ शब्दावली
७.१२ सन्दर्भग्रन्थः
७.१३ सहायकग्रन्थाः
७.१४ बोधप्रश्नोत्तराणि
७.१५ अभ्यासप्रश्नाः

## ७.१ प्रस्तावना

प्रियच्छात्र:! गते पाठे भवता पथिकसम्बन्धिप्रश्नानां प्रश्नकुण्डल्या समाधानार्थं विषयाः पठिताः। तत्र गतस्य पथिकस्य आगमनं, तस्य मार्गे अनिष्टं, आगमनकालेत्यादिकं विषयाः अधीताः। प्राचीनकाले एकदेशात् देशान्तरं व्यापारयात्रादिषु नौकायात्रा साधनभूता भवति-स्म। वर्तमानकालेऽपि प्रायः समुद्रव्यापारे जलयानस्य बहवः प्रयोगाः दृश्यन्ते। व्यापारार्थं गतायाः नौकायाः सकुशलागमनं, समुद्रव्यापारेण लाभालाभेत्यादिकं विषयाः अस्मिन् पाठे पठामः।

तत्र च पाठस्य तृतीये पाठ्यांशे नौकासम्बन्धिप्रश्नानाम् उल्लेखः क्रियते। पुनः नौकाप्रश्ने कस्माद् भावात् विचारः कर्तव्य इति निर्दिष्यते। चतुर्थे पाठ्यांशे नौकाप्रश्ने काले शुभयोगस्य वर्णनं वर्तते। ततः पञ्चमे पाठ्यांशे उत्पातयोगस्य वर्णनं वर्तते तत्र च अरिवह्निकृदुत्पाताः तथा च नौकायाः जलनिमग्नयोगाः वर्ण्यन्ते। तदनु षष्ठे पाठ्यांशे नौकापतेरनिष्टकरयोगः निर्दिष्टः। सप्तमे अष्टमे च पाठ्यांशे नौकाव्यापारात् लाभप्रदयोगाः वर्णिताः वर्तन्ते। एवम्प्रकारेण अस्मिन् पाठे व्यापारार्थं गतायाः नौकायाः वृत्तान्तं प्रश्नकुण्डल्या ज्ञानाय विषद्-विषयाः पठिष्यति।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



## ७.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

- नौकासम्बन्धिप्रश्नस्य विचारः कर्तुं शक्ष्यति।
- नौकाप्रश्ने शुभाशुभयोगान् विज्ञाय नौकाक्षेमं विज्ञातुं शक्ष्यति।
- नौकायां भावितोत्पातानां ज्ञानं कर्तुं शक्ष्यति।
- नौकापते (नाविकस्य) अनिष्टादिकं ज्ञातुं शक्ष्यति।
- नौकाव्यापारे लाभालाभं ज्ञातुं शक्ष्यति।

## ७.३ नौकाप्रश्नाः

प्राचीनकाले एकदेशतः अन्येषु देशेषु वस्तुविनिमये समुद्रपारगमनार्थं नौका एव साधनभूता भवति-स्म। वर्तमानेऽपि प्रायः समुद्रव्यापारे जलयानस्य बहवः प्रयोगाः दृश्यन्ते। व्यापारार्थं गतायाः नौकायाः सकुशलागनम्, समुद्रव्यापारेण लाभालाभेत्यादिकं प्रश्नाः एव नौकाप्रश्नाः कथ्यन्ते। नौकाप्रश्ने प्रायः पृच्छकेन चत्वारः प्रश्नाः पृच्छन्ते। यथोक्तं भुवनदीपकनामके प्रश्नग्रन्थे –

**"क्षेमायातं बहित्रस्य वुडनं प्लवनं जले।**
**पण्यव्यवहृतौ लब्धिर्नाविप्रश्नचतुष्टयम्॥"**

अर्थात् गतायाः नौकायाः सकुशलागमनं, नौकाया बुडनं (जलनिमग्नं), प्लवनम् = चक्रवातेत्यादिना मार्गच्युतिः, तथा नौकाव्यापारेण लाभालाभश्च एते चत्वारः प्रश्ना एव नौकायां विचारणीयाः भवन्ति।

### ७.३.१ नौकाप्रश्ने विचारणीयः भावः

भवता भावविचारविषये पूर्वं पठितं यत् अष्टमभावेन नद्युत्तरणसम्बन्धिविषयाः विचार्यन्ते। अतः नौकाप्रश्नस्यापि विचारः अष्टमभावादेव विचार्यते। प्रश्नभूषणकारः वदति यत् –

**कल्याणसंयुता नौका न वा कल्याणसंयुता।**
**इति प्रश्नेऽष्टमस्थानं सर्वतः परिचिन्तयेत्॥**

**पदविच्छेदः** – कल्याणसंयुता, नौका, न, वा, कल्याणसंयुता, इति, प्रश्ने, अष्टमस्थानं, सर्वतः, परिचिन्तयेत्।

**पदान्वयः** – नौका कल्याणसंयुता वा न कल्याणसंयुता, इति प्रश्ने सर्वतः अष्टमस्थानं परिचिन्तयेत्।

**प्रतिपदार्थः** – नौका = जलयानं, कल्याणसंयुता = जलमग्नादिभयरहिता (कुशलात्मिका), वा = अथवा, न-कल्याणसंयुता = अनिष्टयुता (जलप्लवेत्यादिभिः नष्टा) इति प्रश्ने = पृच्छकेन कृते प्रश्ने सति, सर्वतः, अष्टमस्थानं = प्रश्नकुण्डल्याम् अष्टमभावं, परिचिन्तयेत् = विचारयेत् (दैवज्ञः इति शेषः)।

**सरलार्थः** – व्यापारार्थं गता नौका कुशला न वा इत्यादिकं पृच्छकेन कृते नौकासम्बन्धिप्रश्ने अष्टमभावं दैवज्ञः विचारयेत् इति।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



प्रश्नप्रदीपनामके ग्रन्थेऽपि उक्तं वर्तते –

**व्यापाराय गता नौका बुडिता लाभसंयुता।**
**कल्याणसंयुता वेति प्रश्ने छिद्रं विचारयेत्॥**

**बोधप्रश्नाः**

१. नौका सम्बन्धिताः प्रायः कतिप्रश्नाः भवन्ति ?

२. नौकासम्बन्धितं प्रश्नचतुष्टयं किम् ?

३. नौकाप्रश्ने किं भावं विचार्यं भवति ?

## ७.४ नौकाप्रश्ने शुभयोगः

नौकासम्बन्धिप्रश्ने लग्नलग्नेशयोः तथा अष्टमाष्टमेशयोः शुभा स्थितिः भवेत्। लग्नेशः लग्नं पश्येत् अष्टमेशश्च अष्टमं भावं पश्येत् तदा शुभयोगः भवति। अस्मिन् योगे प्रश्ने सति नौकायाः कुशलत्वं ज्ञेयम्। यथोक्तं प्रश्नभूषणे –

**लग्नं लग्नेश्वरः पश्येदष्टमं निधनाधिपः।**
**न विघ्निता तदा नौका वर्तते कुशलात्मिका॥**

**पदविच्छेदः** – लग्नम्, लग्नेश्वरः, पश्येत्, अष्टमं, निधनाधिपः, न, विघ्निता, तदा, नौका, वर्तते, कुशलात्मिका॥

**पदान्वयः** – (यदा) लग्नेश्वरः लग्नं पश्येत्, निधनाधिपः अष्टमं पश्येत् तदा नौका विघ्निता न (अपितु) कुशलात्मिका वर्तते।

**प्रतिपदार्थः** – यदा, लग्नेश्वरः = लग्नेशः, प्रथमभावस्य स्वामी, लग्नं = प्रथमभावं, पश्येत्, निधनाधिपः = अष्टमभावस्य स्वामी, अष्टमं = अष्टमभावं पश्येत्, तदा, नौका = व्यापारार्थं गता नौका, विघ्निता = विघ्नयुक्ता, न, अपितु, कुशलात्मिका = कुशलयुक्ता वर्तते, इति ज्ञातव्यम्।

**सरलार्थः** – नौकाप्रश्ने यदि लग्नेशः लग्नं पश्येत्, अष्टमेशः अष्टमभावं पश्येत् तदा व्यापारार्थं गता नौका विघ्नयुता नापितु कुशलात्मिका वर्तते इति ज्ञातव्यम्।

उदाहरणार्थं यदि नौकाप्रश्नकाले-वृषलग्नः भवेत् तथा लग्नेशः शुक्रः सप्तमे भावे स्थित्वा लग्नं पश्यति, अष्टमेशश्च गुरुः चतुर्थे भावे स्थितः, पञ्चमदृष्ट्या अष्टमभावं पश्यति। तदा नौका कुशलात्मिका वर्तत इति दैवज्ञः वदेत्। एवमेव अन्यत्रापि ज्ञातव्यम्।




ताजिकनीलकण्ठ्यां प्रश्नतन्त्रे आदिष्टम् आचार्येण यत् यदि नौकाप्रश्ने लग्नेशः लग्नं न पश्येत्, अष्टमेशश्च अष्टमं न पश्येत् तर्हि नौकायाः कुशलत्वं न ज्ञेयम् इति। तद्यथा–



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**''लग्नेशोऽष्टपतिः स्वस्वगेहं नालोकते यदि ।**
**तदा-यानेऽस्य वक्तव्यं निश्चितं मज्जनं बुधैः ।।इति।।**

**सारः** – नौकाप्रश्ने लग्नेशः लग्नं पश्येत् अष्टमेशश्च अष्टमं पश्येत् तदा नौकाकुशलात्मिका वर्तत इति ज्ञातव्यम्।

## ७.५ नौकाप्रश्ने उत्पातयोगः

नौकाप्रश्ने शुभत्वाशुभत्वस्य विचारः लग्नेशाष्टमेशाभ्यां क्रियते इति निश्चितम्। यदि प्रश्नकाले लग्नेशाष्टमेशयोः स्थितिः अनुकूला न स्यात् तर्हि नौकायाम् उत्पातः विजानीयात्। प्रश्नभूषणकारेण नौकाप्रश्ने उत्पातस्य द्वौ भेदौ निरूपितौ –

१. अरिवह्निकृदुत्पातयोगः।

२. जलनिमग्नयोगः।

### ७.५.१ अरिवह्निकृदुत्पातयोगः

व्यापारार्थं गता नौका यदि शत्रुणा नष्टीकृता, लुण्ठकेभ्यः लुण्ठिता अथवा कश्चित् कारणविशेषात् अग्निना दहनीकृता। तदा एते उत्पाताः अरिवह्निकृदुत्पाताः भवन्ति। प्रश्नभूषणे ग्रन्थे उक्तं वर्तते यत् –

यदि प्रश्नकाले लग्नेशोऽष्टमेशश्च सप्तमे भावे स्याताम्, तर्हि नौकायाम् अरिवह्निकृदुत्पाताः भवन्ति इति ज्ञातव्यम्। तद्यथा –

**लग्नपो वाऽष्टमेशश्च सप्तमे यदि वर्तते।**
**तदोत्पातं विजानीयादरिवह्निकृतं तदा।।**

**पदविच्छेदः** – लग्नपः, वा, अष्टमेशः, च, सप्तमे, यदि, वर्तते, तदा, उत्पातं, विजानीयात्, अरि, वह्नि, कृतं, तदा।।

**पदान्वयः** – लग्नपो वा अष्टमेशश्च यदि सप्तमे वर्तते तदा अरिवह्निकृतम् उत्पातं विजानीयात्।

**प्रतिपदार्थः** – लग्नपः = लग्नः प्रथमभावः तस्य स्वामी, वा, अष्टमेशः = अष्टमभावस्य स्वामी, च, यदि, सप्तमे = सप्तमभावे वर्तते, तदा, अरिवह्निकृतम् = शत्रुणा अथवा अग्निना उत्पादितम्, उत्पातं, विजानीयात् = ज्ञातव्यमिति।

**सरलार्थः** – नौका कुशलाऽकुशलावा इति प्रश्ने यदि लग्नेशः अष्टमेशश्च सप्तमे भावे स्यातां तर्हिः नौकायाम् अरिवह्निकृतम् उत्पातं दैवज्ञः जानीयात्।

उदाहरणार्थं यदि पृच्छकः नौका कुशलाऽकुशला वा इति प्रश्नः पृच्छेत्। तदा मेषलग्नः स्यात् लग्नेशः अष्टमेशश्च स्वयं भौमः सप्तमे भावे स्यात् –

तदा नौकायां शत्रुणा, अग्निना वा उत्पातस्य आशंका भवेदिति दैवज्ञः जानीयात्। एवमेव प्रश्नकालेऽभीष्टलग्नेन चिन्तनीयम्।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri






भुवनदीपके श्रीमद्पद्मप्रभुसूरिणा उक्तं वर्तते यत् यदि लग्नाष्टमेशौ सप्तमभावगतौ स्यातां तदा उपद्रवेण नौका जलाप्लाविता भवति इति। तद्यथा –

**लग्नपश्चाष्टमस्थानाधिपतिर्वा भवेद्यदि।**
**सप्तमे कथयन्त्यन्तर्जले वापकिनं तदा॥**

ताजिकनीलकण्ठ्या तु उक्तं वर्तते –

**॥ द्युने वापनिकां कृत्वा यानमायाति मन्दिरम्॥**

अर्थात् प्रश्नकाले लग्नेशाष्टमेशयोः सप्तमे स्थिते सति नौका व्यापारवस्तुं जलनिमग्नीकृत्वा नौकाधिपतिना सह आयाति।

### ७.५.२ जलनिमग्नयोगः

यदि नौकाप्रश्नकाले लग्नेशः लग्नं न पश्यति अष्टमेशः अष्टमभावं न पश्यति। एवम् उपस्थिते योगे सति नौका जलनिमग्ना भवति। यथा –

**लग्नपो नेक्षते लग्नं नाष्टमं निधनाधिपः।**
**नद्यां प्रब्रूडिता नौका विज्ञेया गणकोत्तमैः॥**

**पदविच्छेदः** – लग्नपः, न, इक्षते, लग्नं, न, अष्टमं, निधनाधिपः, नद्यां, प्रब्रूडिता, नौका, विज्ञेया, गणकोत्तमैः।

**पदान्वयः** – लग्नपः लग्नं नेक्षते, निधनाधिपः अष्टमं न (इक्षते), तदा नौका नद्यां प्रब्रूडिता (इति) गणकोत्तमैः विज्ञेया।

**प्रतिपदार्थः** – लग्नपः = लग्नेशः, लग्नं = प्रथमभावं, नेक्षते = न पश्यति, निधनाधिपः = अष्टमेशः, अष्टमं = अष्टमभावं, न, ईक्षते = पश्यति, तदा नौका, नद्यां, प्रब्रूडिता = जलनिमग्ना (इति) गणकोत्तमैः = दैवज्ञैः, विज्ञेया = ज्ञातव्या।

**सरलार्थः** – नौकाप्रश्ने यदि लग्नेशः लग्नं न पश्यति, अष्टमेशश्च अष्टमभावं न पश्यति तदा नौका जलनिमग्ना गता इति दैवज्ञैः ज्ञातव्या।

## ७.६ नौकापतेरनिष्टकरयोगः

नौकासम्बन्धिप्रश्ने यदि कश्चित् पापग्रहः लग्ने, चतुर्थेऽष्टमे वा स्यात् तथा लग्नेशः अस्तं गतः स्यात् तदा नौकायाः चालकः (नौकाधिपः) रोगी मृतः वा इति दैवज्ञः वदेत्। उक्तं हि –

**लग्नेऽष्टमे चतुर्थे वा पापो रविकरेऽङ्गपः।**
**नौकापतिस्तदा रोगी मृतो वेति बुधो वदेत्॥**



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**पदविच्छेदः** – लग्ने, अष्टमे, चतुर्थे, वा, पापः, रविकरे, अङ्गपः, नौकापतिः, तदा, रोगी, मृतः, वा, इति, बुधः, वदेत्।

**पदान्वयः** – (यदि) पापः लग्ने चतुर्थे वा अष्टमे (भवेत्) अङ्गपः (च) रविकरे (भवेत्) तदा नौकापतिः रोगी मृतः वा इति बुधः वदेत्।

**प्रतिपदार्थः** – (यदि) पापः = पापग्रहः, लग्ने = प्रथमभावे, चतुर्थे = चतुर्थभावे, वा = अथवा, अष्टमे = अष्टमभावे (भवेत्), अङ्गपः = लग्नेशः, च, रविकरे= रविणा अस्तङ्गतः (भवेत्) तदा नौकापतिः = नौकायाः स्वामी (नाविकः), रोगी = रोगग्रस्तः, मृतः = मृत्युं प्राप्तः वा, इति, बुधः = विद्वान्, वदेत् = पृच्छकं वदेत्।

**सरलार्थः** – पृच्छकेन नौकाप्रश्ने सति यदि कश्चित् पापग्रहः प्रथमे भावे, चतुर्थे भावे अथवा अष्टमे भावे स्यात्, तथा च लग्नेशः सूर्येण अस्तङ्गतः स्यात् (सूर्येण सह युतः स्यात्) तदा नौकाधिपतिः रोगी अस्ति अथवा मृत्युं प्राप्तः अस्ति इति दैवज्ञः वदेत्। उदाहरणार्थं यदि पृच्छकः नौकासम्बन्धिः प्रश्नः पृच्छेत्, तदा वृषलग्नः स्यात् लग्नेशश्च शुक्रः सूर्येण सह स्यात् शनिः (पापग्रहः) चतुर्थे भावे स्यात् तदा नौकाधिपतिः रोगी अथवा मृतः भवितुं शक्नोति इति दैवज्ञ आदिशेत्।




**बोधप्रश्नाः**

४. नौकायां द्विविधौ उत्पातौ कौ कथितौ ?

५. नौकाप्रश्ने लग्नेशोऽष्टमेशश्च सप्तमे भावे स्यातां तदा कीदृशः उत्पातः ज्ञातव्यः?

६. "द्यूने वापनिकां कृत्वा यानमायाति मन्दिरम्" उक्तिरियम् कुत्र वर्तते ?

७. एका प्रश्नकुण्डली (मिथुनलग्नस्य) निर्मेया यस्मिन् नौकापतेरनिष्टकरयोगः स्यात्।

## ७.७ नौकाप्रश्ने लाभकरः योगः

नौकया व्यापारेण लाभालाभप्रश्ने सति यदि गुरुः अष्टमभावे स्यात् लग्नेशश्च लग्नं पश्येत् तदा लाभः भविष्यति, इति दैवज्ञः वदेत्। यथा हि कुण्डल्यामस्यां-लग्नेशः भौमः पञ्चमे भावे स्थितः सन् लग्नं पश्यति तथा गुरुः वृश्चिकराशौ (अष्टमे भावे) अस्ति। अतः अस्मिन् काले यदि नौकया लाभालाभसम्बन्धिप्रश्नः पृच्छकः करोति तर्हि लाभः भविष्यति इति दैवज्ञेन वक्तव्यम्।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri






यतो हि उक्तं प्रश्नभूषणे –

**नौकाप्रश्ने यदा जीवो निधने लग्ननायकः।**
**लग्नं पश्यति चेल्लाभो व्यवहारान्न संशयः॥**

**पदविच्छेदः** – नौकाप्रश्ने, यदा, जीवः, निधने, लग्ननायकः, लग्नं, पश्यति, चेत्, लाभः, व्यवहारात्, न, संशयः।

**पदान्वयः** – नौकाप्रश्ने यदा निधने जीवः (तथा) लग्ननायकः लग्नं पश्यति चेत् व्यवहारात् लाभः (भवति) अत्र न संशयः।

**प्रतिपदार्थः** – नौकाप्रश्ने = नौकया लाभालाभप्रश्ने, यदा, निधने = अष्टमभावे, जीवः = गुरुः (तथा), लग्ननायकः = लग्नस्य-प्रथमभावस्य स्वामी, लग्नं = प्रथमभावं, पश्यति, चेत्, व्यवहारात् = नौकाव्यापारात्, लाभः (भवति) अत्र न संशयः = शङ्का।

**सरलार्थः** – नौकया लाभालाभप्रश्ने यदा अष्टमभावे गुरुः स्यात् लग्नेशश्च लग्नं पश्यति तदा नौकाव्यापारात् लाभः भविष्यति इति अत्र न किमपि संशयः।

## ७.८ नौकाप्रश्ने विशेषलाभकरयोगः

नौकया लाभालाभप्रश्नकाले यदि शुक्रः शुभग्रहेण युक्तः सन् अष्टमे भावे स्यात्। बलयुक्तः लग्नेशः वली चन्द्रश्च अष्टमे भावे स्यात्। तर्हि व्यापारात् भूरिलाभः भविष्यति इति प्रश्नभूषणे निर्दिष्टम्। तदेवम् –

**अष्टमे सशुभे शुक्रे सबले तनुपेऽपि च।**
**चन्द्रेऽपि तादृशे लग्नं सबलं भूरिलाभकृत्॥**

**पदविच्छेदः** – अष्टमे, सशुभे, शुक्रे, सबले, तनुपे, अपि, च, चन्द्रे, अपि, तादृशे, लग्नं, सबलं, भूरि, लाभकृत्।

**पदान्वयः** – सशुभे शुक्रे अष्टमे सबले तनुपे अपि च तादृशे चन्द्रेऽपि (पुनः) सबलं लग्नं भवेत्तदा भूरिलाभकृत् (भवति)।

**प्रतिपदार्थः** – सशुभे = शुभग्रहेणयुक्ते, शुक्रे = शुक्रग्रहे, अष्टमे = अष्टमभावे, सबले = बलयुक्ते, तनुपे = लग्नेशे, अपि च, तादृशे = लग्नेश इव बलयुक्ते, चन्द्रे = चन्द्रगृहे, अपि, पुनः, सबलं = बलयुक्तं, लग्नं = प्रथमभावं, भवेत्तदा, भूरिलाभकृत् = अधिकलाभकरः (योगः भवति)।

**सरलार्थः** – नौकया लाभालाभप्रश्नकाले यदि शुभग्रहेण युक्तः शुक्रः अष्टमभावे स्यात्, बलयुक्तः लग्नेशः चन्द्रश्च अष्टमे भावे स्यात्, पुनः प्रथमभावः बली भवेत् तदा नौकया व्यापारेण अधिकः लाभः भविष्यति इति, दैवज्ञेन ज्ञातव्यम्। उदाहरणार्थम् एका कुण्डली दीयते –



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri






एवमेव अन्येऽपि योगाः ज्ञातव्याः।

प्रश्नप्रदीपाख्ये ग्रन्थे निर्दिष्टं वर्तते यत् –

शुक्रः यदि शुभग्रहेण दृष्टःयुतो वा अष्टमे भावे स्यात् लग्नेशोऽपि बलवान् भवेत्तदा नौकाव्यापारेण लाभः भवति। अथवाऽपि अष्टमस्थो चन्द्रः लग्नो वा बलवान् भवेत्तदा प्रश्ने सति नौकाव्यापारेण लाभः भवति। तद्यथा -

**शुभयुक्तेक्षितः शुक्रो यदि छिद्रगृहे भवेत्।**
**बलवानपि लग्नेशस्तदा लाभो जलोद्भवः॥**

**अष्टमस्थो यदा चन्द्रो लग्नं वा सबलं भवेत्।**
**परदेशगतैर्द्रव्यस्तदा लाभो विशेषतः॥**

## ७.९ नौकाप्रश्नेऽलाभकरयोगः

नौकया लाभालाभप्रश्ने यदि लग्नेशः अष्टमेशश्च स्व-स्व नीचराशौ स्थितौ स्याताम्, नवमभावगतश्च गुरुः स्वशत्रुग्रहस्य राशौ स्यात् तर्हि नौकाव्यापारात् लाभः न भविष्यति इति दैवज्ञः पृच्छकं वदेत्।

उदाहरणार्थं - यदि कश्चित् पृच्छकः प्रश्नं करोति यत् व्यापारार्थं गतया अमुना नौकया व्यापारेण लाभः भविष्यति न वा। तस्मिन् काले मिथुनलग्नः स्यात् लग्नेशश्च बुधः मीनराशौ (स्वनीचराशौ) स्यात्, अष्टमेशः शनिः मेषराशौ (नीचराशौ) स्यात्, पुनः गुरुः स्वशत्रोः बुधस्य राशौ (मिथुने) स्यात्तदा नौकया अलाभ इति दैवज्ञः वदेत्।




एवमेवान्यत्रापि ज्ञातव्यम्।

प्रश्नभूषणे उक्तं वर्तते -

**लग्नाष्टमपती नीचे गुरुर्नवमगो यदि।**
**रिपुक्षेत्रे तदा लाभो न नौकाव्यवहारतः॥**

**पदविच्छेदः** – लग्न, अष्टमपती, नीचे, गुरुः, नवमगः, यदि, रिपुक्षेत्रे, तदा, लाभः, न, नौकाव्यवहारतः।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**पदान्वयः** – लग्नाष्टमी यदि नीचे नवमगः गुरुः रिपुक्षेत्रे तदा नौकाव्यवहारतः लाभ न।

**प्रतिपदार्थः** – लग्नाष्टमपती = लग्नस्य-प्रथमभावस्य अष्टमभावस्य च स्वामिनौ, यदि, नीचे = नीचराशौ, नवमगः = नवमभावगतः, गुरुः = बृहस्पतिग्रहः, रिपुक्षेत्रे = स्वशत्रुग्रहस्य राशौ, तदा, नौकाव्यवहारतः = नौकया व्यापारेण, लाभः = धनलाभः, न।

**सरलार्थः** – नौकया लाभालाभप्रश्ने प्रथमभावस्य अष्टमभावस्य च स्वामिनौ स्व-स्वनीचराशौ स्याताम्, नवमभावगतः गुरुः स्वशत्रुग्रहस्य राशौ स्यात् तदा नौकया अलाभः इति दैवज्ञः वदेत्।

**बोधप्रश्नाः**

८. नौकायाः कुशलत्वं केन योगेन ज्ञातव्यम्?

९. यदि गुरुः अष्टमे भावे स्यात् लग्नेशश्च लग्नं पश्येत् तदा नौकाप्रश्ने लाभः हानिर्वा?

**मूलपाठः**

**कल्याणसंयुता नौका न वा कल्याणसंयुता।**
**इति प्रश्नेऽष्टमस्थानं सर्वतः परिचिन्तयेत्॥**

**लग्नं लग्नेश्वरः पश्येदष्टमं निधनाधिपः।**
**न विघ्निता तदा नौका वर्तते कुशलात्मिका॥**

**लग्नपो वाऽष्टमेशश्च सप्तमे यदि वर्तते।**
**तदोत्पातं विजानीयादरिवह्निकृतं तदा॥**

**लग्नपो नेक्षते लग्नं नाष्टमं निधनाधिपः।**
**नद्यां प्रबूडिता नौका विज्ञेया गणकोत्तमैः॥**

**लग्नेऽष्टमे चतुर्थे वा पापो रविकरेऽङ्गपः।**
**नौकापतिस्तदा रोगी मृतो वेति बुधो वदेत्॥**

**नौकाप्रश्ने यदा जीवो निधने लग्ननायकः।**
**लग्नं पश्यति चेल्लाभो व्यवहारान्न संशयः॥**

**अष्टमे सशुभे शुक्रे सबले तनुपेऽपि च।**
**चन्द्रेऽपि तादृशे लग्नं सबलं भूरिलाभकृत्॥**

**लग्नाष्टमपती नीचे गुरुर्नवमगो यदि।**
**रिपुक्षेत्रे तदा लाभो न नौकाव्यवहारतः॥**

## ७.१० सारांशः

प्रियच्छात्र:! भवता "नौकाप्रश्नः" इत्याख्यस्य पाठस्य अध्ययनं कृतम्। अस्मिन् पाठे नौकासम्बन्धिप्रश्नानां समाधानार्थं विषयाः अधीताः। तत्र नौकासम्बन्धिताः प्रायशः चत्वारो प्रश्नाः भवन्ति। तत्रोक्तं 'क्षेमायातं वहित्रस्य वुडनं प्लवनं जले पण्यव्यवहृतौ लब्धिर्नाविप्रश्नचतुष्टयमिति॥ नौकासम्बन्धिप्रश्नानां विचारः प्रमुखत्वेन अष्टमभावात् क्रियते।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



यदि प्रश्नकाले लग्नेशः लग्नम् अष्टमेशश्च अष्टमं भावं पश्येत् तदा शुभयोगः भवति। अनेन योगेन नौकायाः कुशलत्वं ज्ञेयम्। नौकायामुत्पाताद्याशङ्कायां प्रश्नकाले लग्नेशाष्टमेशयोः अननुकूला स्थितिः उत्पातसूचिका भवति। तदर्थं लग्नेशोऽष्टमेशश्च सप्तमे भावे स्यातां तर्हि नौकायाम् अरिवह्निकृदुत्पाताः भवन्ति। तथा च प्रश्नकाले लग्नेशः लग्नं न पश्यति अष्टमेशश्च अष्टमं न पश्यति एवं योगे सति नौका जलनिमग्ना भवति। पुनः प्रश्नकाले यदि लग्ने-चतुर्थे-अष्टमे वा कश्चित् पापग्रहः स्यात् लग्नेशः अस्तंगतः स्यात्तदा नौकापतेः (नाविकस्य) अनिष्टं ज्ञातव्यम्। तथैव नौकया लाभालाभप्रश्ने अष्टमभावे गुरुः स्यात् लग्नेशश्च लग्नं पश्येत् तदा लाभो ज्ञातव्यः। पुनः प्रश्नकाले शुक्रः शुभग्रहेण युक्तः अष्टमभावे स्यात्, बलयुक्तः लग्नेशः चन्द्रश्च अष्टमे भावे स्यात् पुनः प्रथमभावः वली भवेत्तदा नौकाव्यापारेण प्रचुरधनलाभः ज्ञातव्यः। परन्तु यदि लग्नेशोऽष्टमेशश्च स्व-स्वनीचराशौ स्थितौ स्यातां नवमभावगतश्च गुरुः स्वशत्रुग्रहस्य राशौ स्यात् तर्हि नौकाव्यापारात् लाभः न भवेत्। एवम्प्रकारेण नौकासम्बन्धि-विविधप्रश्नानां समाधानार्थं विषयाः अधीताः।

## ७.११ शब्दावली

| | | | |
|---|---|---|---|
| १. | बुडनम् | = | जले निमग्नम्। |
| २. | प्लवनम् | = | नौकायाः मार्गच्युतिः। |
| ३. | लग्ननायकः | = | लग्नेशः। |
| ४. | जलोद्भवः | = | जलात् निष्पन्नः। |
| ५. | नौकापतिः | = | नौकाधिपः (नाविकः)। |

## ७.१२ सन्दर्भग्रन्थः

१. प्रश्नभूषणम् (दैवज्ञजीवननाथझा), आचार्यः गुरुप्रसादगौड़ः, चौखम्भासुरभारती-प्रकाशनम्, वाराणसी।

## ७.१३ सहायकग्रन्थाः

१. **प्रश्नवैष्णवः**, पं. श्रीउमाकान्तझाः, नागप्रकाशकः, यू.ए. जवाहरनगर, दिल्ली।

२. **भुवनदीपकम् ( विज्ञानभाष्य )**, शुकदेवचतुर्वेदी, रंजनपब्लिकेशन, अंसारी रोड दरियागंज, नई दिल्ली।

३. **षट्पञ्चाशिका**, डॉ. सत्येन्द्रमिश्रः, चौखम्भासंस्कृतसंस्थानम्, वाराणसी।

४. **ताजिकनीलकण्ठी**, डॉ. शिवप्रसादशर्मा, आचार्य-श्रीनिवासशर्मा, भारतीयविद्याप्रकाशनम्, दिल्ली।

५. **भुवनदीपकम्**, संस्कृतभाष्यम्, ले.-प्रो. वासुदेवशर्मा, राष्ट्रियसंस्कृतसंस्थानम् जयपुरपरिसरः, जयपुरम्।

## ७.१४ बोधप्रश्नोत्तराणि

१. चत्वारः।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



२. क्षेमायातं बहित्रस्य वुडनं प्लवनं जले। पण्यव्यवहतौ लब्धिर्नाविप्रश्नचतुष्टयम्।।

३. अष्टमभावः।

४. (१) अरिवह्निकृदुत्पातः। (२) जलनिमग्नः।

५. अरिवह्निकृदुत्पातः।

६. ताजिकनीलकण्ठ्याम्।

७.




अस्यां कुण्डल्यां पापग्रहः (भौमः) लग्ने अस्ति, लग्नेशश्च (बुधः) अस्तं गतः अतः अस्मिन्योगे प्रश्ने सति नौकापतेरनिष्टः स्यात्।

८. लग्नेशः लग्नं पश्येत् अष्टमेशश्च अष्टमं पश्येत् तदा नौकायाः कुशलत्वं ज्ञातव्यम्।

९. लाभः।

## ७.१५ अभ्यासप्रश्नाः

१. नौकासम्बन्धिप्रश्ने शुभयोगकारिका एका कर्कलग्नस्य कुण्डली निर्मेया।

२. यदि केनचित् मिथुनलग्ने नौकासम्बन्धिप्रश्नः क्रियते तदा कः योगः नौकया विशेषलाभकरः भविष्यति। कल्पितकुण्डल्या निर्देशनं कार्यम्।

३. प्रश्नकाले कीदृशी स्थितिः नौकायाः जलनिमग्नयोगः निर्माति? कल्पितकुण्डल्या स्पष्टीकरणं क्रियताम्।

—•—



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



# अष्टमः पाठः - शत्रुप्रश्नः

## पाठसंरचना

८.१ प्रस्तावना
८.२ उद्देश्यम्
८.३ शत्रुप्रश्नविचारः
८.३.१ शत्रुप्रश्ने विचारणीयाः भावाः
बोधप्रश्नाः
८.४ रिपुपराजययोगः
८.५ शत्रुपलायनयोगः
८.६ शत्रुनिवर्तनयोगः
बोधप्रश्नाः
८.७ शत्रूणां शुभाशुभयोगः
८.८ प्रश्नकाले चन्द्रस्थितिवशात् शत्रोः गमागमनविचारः
८.८.१ चन्द्रस्थितिवशात् शत्रुनिवर्तनयोगः
बोधप्रश्नाः
८.९ ग्रहस्थितिवशाच्छत्रुगमागमविचारः
बोधप्रश्नाः
८.१० शत्र्वागमनकालज्ञानम्
बोधप्रश्नाः
८.११ सारांशः
८.१२ शब्दावली
८.१३ सन्दर्भग्रन्थः
८.१४ सहायकग्रन्थाः
८.१५ बोधप्रश्नोत्तराणि
८.१६ अभ्यासप्रश्नाः

## ८.१ प्रस्तावना

प्रियच्छात्रः! गतेपाठे भवता नौकासम्बन्धिविषयाः पठिताः। तत्र व्यापारार्थं गतायाः नौकायाः वृत्तान्तज्ञानार्थं गता नौका सकुशली समागमिष्यति न वा, नौकाव्यापारात् लाभः भविष्यति न वेत्यादिकं विषयाः पठिताः। इदानीं अस्मिन् पाठे शत्रुप्रश्नानां विचारस्य विषयाः निर्दिष्टाः। प्राचीनकाले राजानः स्वराज्यसमृद्ध्यर्थम् अन्येषु राज्येषु आक्रमणं कुर्वन्ति-स्म, तदा प्रत्येकस्य राज्यस्य राजा यायिराज्ञः सैनिकेभ्यः भीतः दैवज्ञं पृच्छति-स्म यत् शत्रुः बली निर्बलो वा। युद्धेऽस्मिन् तस्य जयः भविष्यति पराजयो वा। अथवा शत्रुः युद्धाय समागमिष्यति अथवा निर्वतयिष्यति इत्यादिकम् एते प्रश्नाः शत्रुप्रश्नाः भवन्ति। वर्तमानकालेऽपि समापन्ने युद्धकाले अथवा युद्धाशङ्कायां जनाः प्रायः युद्धवृत्तान्तं दैवज्ञं परिपृच्छन्ति। एतेषां शत्रुप्रश्नानां विचारः प्रश्नकुण्डल्या दैवज्ञेन कथं कर्त्तव्यम्? इत्येते विषयाः पाठेऽस्मिन् वर्णिताः सन्ति। तत्राप्यस्य तृतीये पाठ्यांशे शत्रुप्रश्नः तथा शत्रुप्रश्ने विचारणीयान् भावान् निरूप्यते। तदनु चतुर्थे पाठ्यांशे शत्रुपराजययोगः पञ्चमे पाठ्यांशे शत्रुपलायनयोगः, षष्ठे पाठ्यांशे शत्रुनिवर्तन योगश्च निरूप्यते। सप्तमे पाठ्यांशेऽस्य प्रश्नलग्नस्थितेः वशात् शत्रोः शुभाशुभयोगाः निरूप्यन्ते। ततः अष्टमे पाठ्यांशे चन्द्रस्थितिवशात् शत्रोः गमनागमनविषयः निरूप्यन्ते। पुनश्चास्य नवमे पाठ्यांशे ग्रहाणां स्थितिवशात् शत्रुवृत्तान्तं शत्रुगमनागमनेत्यादिकाः विषयाः निरूप्यन्ते। ततः अन्ते दशमे पाठ्यांशे शत्र्वागमनस्य कालज्ञानार्थं नियमः दीयते। एवम् अस्मिन् पाठे शत्रुवृत्तान्तं प्रश्नकुण्डल्या ज्ञानाय विषयाः वर्ण्यन्ते।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



## ८.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

- प्रश्नकुण्डली माध्यमेन पृच्छकस्य शत्रोः स्थितिः वक्तुं शक्ष्यति।
- युद्धेः शत्रोः जयः भविष्यति पराजयो वेति ज्ञातुं शक्ष्यति।
- आगतः शत्रुः विना-युद्धं निवर्तयिष्यति वेत्यादिकं निर्धारितुं शक्ष्यति।
- युद्धे शत्रुः पलायितः भविष्यति वेत्यादिकं वक्तुं शक्ष्यति।
- आशङ्कितः शत्रुः कदा आगमिष्यति इति निर्धारितुं शक्ष्यति।

## ८.३ शत्रुप्रश्नविचारः

शत्रुसम्बन्धिप्रश्नस्य प्रश्नकुण्डल्या विचार एव शत्रुप्रश्नविचारः कथ्यते। प्राचीनकाले राजानः स्वराज्यसमृद्ध्यर्थम् अन्येषु राज्येषु आक्रमणं कुर्वन्ति-स्म। तदा प्रत्येकस्य राज्यस्य राजा अथवा सेनापतिः आक्रमणकारिभ्यः शत्रुसैनिकेभ्यः भीतः सन् प्रायः दैवज्ञं पृच्छति-स्म यत् आक्रामकः बलवान् बलहीनः वा। मम जयो भविष्यति न वा। शत्रुः जेष्यति वा। अथवा शत्रुः विना युद्धं निवर्तयिष्यति न वेत्यादिकम्। एते प्रश्नाः शत्रुप्रश्नाः भवन्ति। वर्तमानकालेऽपि समापन्ने युद्धकाले प्रायः जनाः युद्धवृत्तान्तं दैवज्ञं परिपृच्छन्ति। एतेषां प्रश्नानां विचारः दैवज्ञेन सम्यक् प्रकारेण कर्त्तव्यः।

### ८.३.१ शत्रुप्रश्ने विचारणीयाः भावाः

कुण्डल्यां प्रमुखरूपेण षष्ठः भावः शत्रुभावः भवति। अतः पृच्छकस्य शत्रुस्थितेः विचारः षष्ठभावेन क्रियते। तथापि सप्तमभावात्, अष्टमभावात् तथा द्वादशभावाच्च क्रमात् शत्रु - संग्राम - रिपुवृत्तान्तादिकं विचार्यते। प्रश्नभूषणे तु प्रायः शत्रुचिन्ताप्रश्ने चतुर्थभावेन विषयाः निरूपिता इति।

## ८.४ रिपुपराजययोगः

सामान्यतया शत्रुवृत्तान्तप्रश्ने यदि प्रश्नलग्नात् चतुर्थे भावे कर्क-वृश्चिक-कुम्भ-मीनराशिषु कश्चिदेकः स्यात्तदा आक्रान्ताशत्रोः पराजयः ज्ञातव्यः। अथवा निश्चेतुं शक्यते यत् सामान्यतया मेष-सिंह-वृश्चिक-धनुराशयः प्रश्नलग्ने स्युः तदा प्रश्नात् शत्रोः पराजयं वक्तव्यम्।






Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri






अथवा प्रश्नलग्ने चरराशौ (मेष-कर्क-तुला-मकरराशिषु अन्यतमे) पापग्रहाः स्युः तदा प्रश्नात् शत्रोः पराजयः ज्ञातव्यः।

## ८.५ शत्रुपलायनयोगः

शत्रुवृत्तान्तप्रश्ने चतुष्पदराशिषु (मेष-वृष-सिंह-धनुराशिषु) कश्चिदेकः चतुर्थे भावे स्यात्तदा शत्रोः पलायनं ज्ञातव्यम्।




प्रश्नभूषणे निर्दिष्टं वर्तते -

**सुखालयेऽलिकुम्भमीनकर्कटा भवन्ति चेद्।**
**रिपोः पराजयस्तदा पलायनं चतुष्पदैः॥**

**पदविच्छेदः** – सुखालये, अलि, कुम्भ, मीन, कर्कटाः, भवन्ति, चेत्, रिपोः, पराजयः, तदा, पलायनं, चतुपदैः।

**पदान्वयः** – सुखालये चेत् अलिकुम्भमीनकर्कटाः भवन्ति तदा रिपोः पराजयः स्यात्, (सुखालये) चतुष्पदैः पलायनं (स्यात्)।

**प्रतिपदार्थः** – सुखालये = चतुर्थभावे, चेत् = यदि, अलिः = वृश्चिकराशिः, कुम्भः = कुम्भराशिः, मीनः = मीनराशिः, कर्कटाः = कर्कराशिः, भवन्ति, तदा रिपोः = शत्रोः पराजयः, स्यात् (सुखालये) चतुष्पदैः = चतुष्पदराशिस्थितैः, पलायनं = शत्रोः पलायनं, स्यात्।

**सरलार्थः** – शत्रुप्रश्नकाले यदि चतुर्थे भावे वृश्चिक-कुम्भ-मीन-कर्कराशिषु



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



कश्चिदेकः स्यात्तदा शत्रोः पराजयः ज्ञातव्यः। पुनः प्रश्नलग्नात् चतुर्थे भावे चतुष्पदराशिषु (मेष-सिंह-वृष-धनुराशिषु) कश्चित् स्यात्तदा शत्रोः पलायनं भवति।

मतमिदं वराहमिहिरस्य पुत्रेण श्रीमद्पृथुयशसा वर्णितं षट्पञ्चाशिकायां तद्यथा –

**झषालिकुम्भकर्कटा रसातले यदा स्थिताः।**
**रिपोः पराजयस्तदा चतुष्पदैः पलायनम्॥**

**पदविच्छेदः** – झषः, अलिः, कुम्भः, कर्कटाः, रसातले, यदा, स्थिताः, रिपोः, पराजयः, तदा, चतुष्पदैः पलायनम् ज्ञातव्यम्।

**पदान्वयः** – झषालिकुम्भकर्कटाः यदा रसातले स्थिताः तदा रिपोः पराजयः (तथा) चतुष्पदैः पलायनं ज्ञातव्यम्।

**प्रतिपदार्थः** – झलाषिकुम्भकर्कटाः = झषः = मीनराशिः, अलिः = वृश्चिकराशिः, कुम्भः = कुम्भराशिः, कर्कटः = कर्कराशिः (एते राशयः) यदा, रसातले = चतुर्थे भावे, स्थिताः, तदा, रिपोः = शत्रोः पराजयः (तथा) चतुष्पदैः = चतुर्थे भावे चतुष्पदराशिस्थितैः, पलायनं, ज्ञातव्यम्।

**सरलार्थः** – शत्रुप्रश्नकाले, मीन-वृश्चिक-कुम्भ-कर्कराशिषु कश्चिदेकः चतुर्थे भावे स्यात् तदा शत्रोः पराजयः, तथा च प्रश्नकाले चतुर्थे भावे चतुष्पदराशिस्थिते सति शत्रोः पलायनं ज्ञातव्यम्।

## ८.६ शत्रुनिवर्तनयोगः

शत्रुवृत्तान्तप्रश्ने यदि सर्वे पापग्रहाः प्रश्नलग्नात् पञ्चमे षष्ठे वा भावे स्युः तदा शत्रुः आगत्य पुनः निवर्तते। अथवा चतुर्थे भावे पापग्रहाः स्युः तदा अपि शत्रोरागमनपूर्वकं शीघ्रं निवर्तनं ज्ञातव्यम्। उच्यते हि प्रश्नभूषणकारेण –

**सुतारिभावगैः खलैर्निवर्ततेऽरिवाहिनी।**
**खलैश्चतुर्थभावगैः समेत्य यात्यरं परः॥**

**पदविच्छेदः** – सुत, अरि, भावगैः, खलैः, निवर्तते, अरिवाहिनी, खलैः, चतुर्थभावगैः, समेत्य, याति, अरं, परः।

**पदान्वयः** – खलैः सुतारिभावगैः अरिवाहिनी निवर्तते। खलैः चतुर्थभावगैः परः समेत्य अरं याति।

**प्रतिपदार्थः** – खलैः = क्रूरग्रहैः, सुतारिभावगैः = पञ्चमषष्ठभावस्थितैः (सति), अरिवाहिनी = शत्रुसेना, निवर्तते = प्रतिगच्छति। खलैः = क्रूरग्रहैः, चतुर्थभावगैः = चतुर्थे भावे स्थिते सति, परः = शत्रुः, समेत्य = समागत्य, अरं = शीघ्रं, याति = स्वदेशं प्रतिगच्छति।

**सरलार्थः** – शत्रुसम्बन्धिप्रश्नकाले पञ्चमे षष्ठे भावे वा पापग्रहाः स्युः तदा शत्रोः निवर्तनं ज्ञातव्यम्। तथैव प्रश्नकाले चतुर्थे भावे पापग्रहाः स्युः तदा शत्रुः समागत्य शीघ्रमेव स्वदेशं प्रतिगच्छति, इति ज्ञातव्यम्।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri









पृथुयशसाऽपि उक्तं षट्पञ्चाशिकायाम् –

**सुतशत्रुगतैः पापैः शत्रुर्मार्गान्निवर्तते।**
**चतुर्थगैरपि प्राप्तः शत्रुर्भग्नो निवर्तते॥**

**पदच्छेदः** – सुतशत्रुगतैः, पापैः, शत्रुः, मार्गात्, निवर्तते, चतुर्थगै, अपि, प्राप्तः, शत्रुः, भग्नः, निवर्तते।

**पदान्वयः** – सुतशत्रुगतैः पापैः शत्रुः मार्गात् निवर्तते। (पापैः) चतुर्थगैः अपि शत्रुः प्राप्तः भग्नः निवर्तते।

**प्रतिपदार्थः** – सुतशत्रुगतैः = पञ्चमषष्ठभावगतैः, पापैः = पापग्रहैः, शत्रुः, मार्गात् निवर्तते = स्वदेशं प्रतिगच्छतिः, पापैः = पापग्रहैः, चतुर्थगैः = चतुर्थभावस्थितैः, अपि, शत्रुः, प्राप्तः भग्नः = पराजितो भूत्वा, निवर्तते = स्वदेशं गच्छति।

**सरलार्थः** – प्रश्नकाले पञ्चमषष्ठभावे गतैः पापग्रहैः शत्रोः निवर्तनं ज्ञातव्यम्। पुनः पापैः चतुर्थभावगतैरपि शत्रुः पराजितो भूत्वां स्वदेशं गच्छतीति ज्ञातव्यम्।

**बोधप्रश्नाः**

१. कुण्डल्यां कः भावः शत्रुभावः भवति?

२. चतुर्थे भावे वृश्चिकराशिः स्यात्तदा शत्रोर्वृत्तान्तं किं व्यातव्यम्?

३. शत्रुप्रश्ने चतुर्थे भावे चतुष्पदराशिस्थितेः किं फलम् भवति?

४. शत्रुप्रश्ने षष्ठे भावे पापग्रहाः किं कुर्वन्ति?

## ८.७ शत्रूणां शुभाशुभयोगः

प्रश्नकाले यदि चरराशिः (मेष-कर्क-तुला-मकरराशिष्वन्यतमः) लग्ने-स्यात्तथा लग्ने शुभग्रहोऽपि भवेत्तदा शत्रोः शुभत्वं (शत्रोर्विजयः) ज्ञातव्यः। तथा च चरराशौ लग्ने एव पापग्रहाः स्युः तदा शत्रोः पराजयः ज्ञातव्यः। तथैव स्थिरराशौ लग्नेऽपि शुभग्रहाः शत्रोः शुभसूचकाः तथा पापग्रहाः अशुभसूचकाः भवन्ति। यथोक्तं प्रश्नभूषणे –

**चरोदये शुभः शुभं करोति यायिनामरं।**
**खलैरशोभनं तदा स्थिरेऽपि वा सुशोभनम्॥**

**पदविच्छेदः** – चरोदये, शुभः, शुभं, करोति, यायिनाम्, अरं, खलैः, अशोभनं, तदा, स्थिरे, अपि, वा, सुशोभनम्।

**पदान्वयः** – चरोदये शुभः (स्यात्तदा) यायिनाम् अरं शुभं करोति, वा खलैः (चरे तदा यायिनाम्) अशोभनं स्यात्। वा स्थिरेऽपि सुशोभनम्।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**प्रतिपदार्थः** – चरोदये = चरराशौ लग्ने, शुभः = शुभग्रहः, स्यात्तदा यायिनाम् = आक्रान्तशत्रूणां, अरं = शीघ्रं, चरे = चरराशौ तदा यायिनाम् अशोभनम् = अशुभप्रदः, पराजयः, वा स्यात्। वा = अथवा स्थिरेऽपि = स्थिरराशौ अपि, सुशोभनं = शुभं भवति।

**सरलार्थः** – शत्रुवृत्तान्तसम्बन्धिप्रश्नकाले चरराशौ लग्ने गते तत्र शुभग्रहेऽपि शत्रूणां कृते शुभसूचकः भवति, अतः शत्रोः विजयः इति दैवज्ञः चिन्तयेत्। तथैव प्रश्नकाले चरलग्ने एव पापग्रहैः शत्रोः पराजयः भविष्यति इति पृच्छकं निर्दिशेत्। तथैव स्थिरराशौ अपि शुभाशुभग्रहवशात् ज्ञातव्यं षट्पञ्चाशिकायामपि अस्मिन्नेव प्रसङ्गे वर्णितं वर्तते –

**चरोदये शुभः स्थितः शुभं करोति यायिनाम्।**
**अशोभनैरशोभनं स्थिरोदयेऽपि वा शुभम्॥**

**पदविच्छेदः** – चरोदये, शुभः, स्थितः, शुभं, करोति, यायिनाम्, अशोभनैः, अशोभनं, स्थिरोदये, अपि, वा शुभम्॥

**पदान्वयः** – चरोदये स्थितः शुभः यायिनां शुभं करोति, अशोभनैः अशोभनं (तथा) स्थिरोदयेऽपि वा शुभं भवति।

**प्रतिपदार्थः** – चरोदये = चरराशौ स्थिते लग्ने, स्थितः = गतः, शुभः = शुभग्रहः, यायिनां = शत्रूणां, शुभं करोति = विजयप्रदः भवति। अशोभनैः = अशुभग्रहैः, अशोभनं = शत्रूणां कृते पराजयसूचकं, तथा, स्थिरोदयेऽपि = स्थिरराशौ लग्ने सत्यपि, वा = विकल्पात्, शुभं = शत्रूणां कृते शुभं भवति।

**सरलार्थः** – शत्रुवृत्तान्तप्रश्नकाले चरराशौ लग्ने स्थिते शुभग्रहे सति शत्रूणां शुभं भवति, तथा चरराशौ एव अशुभग्रहे सति शत्रूणां कृते अशुभं भवति। तथैव स्थिरराशावपि शुभग्रहे शुभम् अशुभग्रहे सति अशुभम् इति ज्ञातव्यम्।

**ध्यातव्यम्** – उपरोक्तेन ज्ञायते यत् प्रश्नकाले लग्ने चरराशौ स्थिरराशौ वाऽपि शुभग्रहेण शत्रोः विजयः तथा अशुभग्रहेण शत्रोः पराजयः ज्ञातव्य इति। ताजिकनीलकण्ठ्यां प्रश्नतंत्रे उक्तं वर्तते यत् –

**प्रश्ने विलग्ने क्रूरे वा दुर्गभङ्गो न जायते।**
**विशेषतो भूमिपुत्रे राहौ वा मूर्ति-गे सति॥**

अर्थात् प्रश्नकाले लग्ने यस्मिन् कस्मिन्नपिराशौ क्रूरग्रहः विशेषकरः भौमः अथवा राहुः स्यात्तदा स्वदुर्गस्य भङ्गः न भवति अपितु शत्रोः पराजयः ज्ञातव्य इति।

## ८.८ प्रश्नकाले चन्द्रस्थितिवशात् शत्रोः गमागमनविचारः

प्रश्नकाले यदि चन्द्रः स्थिरराशौ भवेत्तथा च लग्ने चरराशिः स्यात्तदा शत्रोः आगमनं न भवति अतः शत्रुसम्बन्धि-आशङ्का न कार्या इति दैवज्ञः निर्दिशेत्। परन्तु यदि प्रश्नकाले चन्द्रः चरराशौ भवेत् लग्ने च स्थिरराशिः स्यात्तदा शत्रोः आगमनं भविष्यति इति ज्ञातव्यम्। तथैवोक्तं प्रश्नभूषणे दैवज्ञेन जीवनाथझामहोदयेन –

**निशापतिः स्थिरे चरे तनावरेर्न चागमः।**
**तदागमो विपर्यये विपर्ययः पुरातनैः॥**

**पदविच्छेदः** – निशापतिः, स्थिरे, चरे, तनौ, अरेः, न, च, आगमः, तदा, आगमः, विपर्यये, विपर्ययः, पुरातनैः।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**पदान्वयः** – निशापतिः स्थिरे तथा तनौ चरे भवेत्तदा अरेः आगमः न भवति। विपर्यये विपर्ययः तदा आगमः पुरातनैः कथितः।

**प्रतिपदार्थः** – निशापतिः = चन्द्रः, स्थिरे = स्थिरराशौ तथा तनौ = लग्ने, चरे = चरराशौ, भवेत्तदा, अरेः = शत्रोः, आगमः = आगमनं, न भवति। विपर्यये = उक्तपरिस्थितेः विपरीते, विपर्ययः = विपरीतफलं, तदा, आगमः = शत्रोः आगमनं, पुरातनैः = पूर्वविद्वद्भिः, कथितः।

**सरलार्थः** – प्रश्नकाले यदि चन्द्रः स्थिरराशौ तथा लग्नं चरराशौ भवेत्तदा शत्रोः आगमनं न तथा एतस्य विपरीते सति अर्थात् प्रश्नकाले चन्द्रः चरराशौ लग्नञ्च स्थिरराशौ भवेत्तदा शत्रो आगमनं भविष्यति इति चिन्तनीयम्। मतमिदं प्राचीनाचार्याणामस्ति इति।

षट्पञ्चाशिकायामपि उक्तं वर्तते –

**स्थिरे शशी चरोदये न चाऽऽगमो रिपोर्यदा।**
**तदाऽऽगमं रिपोर्वदेद्विपर्यये विपर्ययम्॥**

**पदविच्छेदः** – स्थिरे, शशी, चरोदये, न, च, आगमः, रिपोः, यदा, तदा, आगमं, रिपोः, वदेत्, विपर्यये, विपर्ययम्॥

**पदान्वयः** – यदा स्थिरे शशी उदये च चरः तदा रिपोः न आगमः (पुनः) विपर्यये विपर्ययम् (तदा) रिपोः आगमं वदेत्।

**प्रतिपदार्थः** – यदा, स्थिरे = स्थिरराशौ, शशी = चन्द्रः, उदये = लग्ने, च, चरः = चरराशिः (स्यात्) तदा, रिपोः = शत्रो, न आगमः = आगमनं न भवति, पुनः विपर्यये = उक्तस्थितेः विपरीते, विपर्ययम् = विपरीतं फलं भवति, तदा रिपोः = शत्रोः, आगमं = आगमनं, वदेत् (दैवज्ञः इति शेषः)।

**सरलार्थः** – प्रश्नकाले यदा स्थिरराशौ चन्द्रः स्यात् लग्ने च चरराशिः स्यात्तदा शत्रोः आगमनं न इति ज्ञातव्यम्। परन्तु प्रश्नकाले यदि चरराशौ चन्द्रः स्यात् तथा लग्ने स्थिरराशिः स्यात्तदा शत्रोः आगमनं भविष्यति इति दैवज्ञः वदेत्।

### ८.८.१ चन्द्रस्थितिवशात् शत्रुनिवर्तनयोगः

शत्रुवृत्तान्तप्रश्नकाले यदि चन्द्रः द्विस्वभावराशौ स्यात् लग्ने च स्थिरराशिः स्यात्तदा आगतस्य शत्रोः विना-युद्धमेव निवर्तनं भविष्यतीति ज्ञातव्यम्। तथैव लग्ने द्विस्वभावराशिः भवेत् चन्द्रश्च चरराशौ स्यात्तदा शत्रोः शीघ्रनिवर्तनं ज्ञातव्यम्। यथोक्तं हि–

**द्विरात्मभावगे विधौ स्थिरोदयेऽरिवाहिनी।**
**सुदूरमागता सती निवर्त्तते यदा तदा॥**

**द्विदेहभे तनौ शशी चरेऽपि सा निवर्तते।**
**विपर्ययेऽरिवाहिनी द्विषत्पुरं समेति सा॥**

**पदविच्छेदः** – द्विरात्मभावगे, विधौ, स्थिरोदये, अरिवाहिनी, सुदूरमागता, सती, निवर्तते, यदा, तदा, द्विदेहभे, तनौ, शशी, चरे, अपि, सा, निवर्तते, विपर्यये, अरिवाहिनी, द्विषत्, पुरं, समेति, सा॥

**पदान्वयः** – विधौ द्विरात्मभावगे स्थिरोदये सुदूरमागता अरिवाहिनी निवर्तते। यदा द्विदेहभे तनौ शशी चरे भवेत् तदा अपि सा अरिवाहिनी निवर्तते। विपर्यये द्विषत्पुरं समेति।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**प्रतिपदार्थः** – विधौ = चन्द्रे, द्विरात्मभावगे = द्विस्वभावराशौ गते, स्थिरोदये = स्थिरराशौ लग्ने, सुदूरमागता = दूरतः समागता, अरिवाहिनी = शत्रुसेना, निवर्तते = प्रतिगच्छति, यदा, द्विदेहभे = द्विस्वभावराशौ, तनौ = लग्ने, सा, अरिवाहिनी = शत्रुसेना, निवर्तते = प्रतिगच्छति। विपर्यये = उक्तस्थितेः विपरीतं, द्विषत् = शत्रुः, पुरं = पृच्छकस्य नगरं समेति = समागच्छति।

**सरलार्थः** – शत्रुवृत्तान्तप्रश्ने यदि चन्द्रः द्विस्वभावराशौ स्यात् तथा लग्ने स्थिरराशिः स्यात्तदा सुदूरतः समागता अपि शत्रुसेना स्वनगरं प्रति-गच्छति। तथैव द्विस्वभावराशौ लग्ने सति चन्द्रः चरराशौ भवेत्तदा शत्रुसेना निवर्तयति इति। एतस्य विपरीतस्थितौ, अर्थात् चन्द्रः स्थिरराशौ, लग्नश्च द्विस्वभावराशौ भवेदथवा चन्द्रः द्विस्वभावराशौ लग्नश्च चरराशौ भवेत्तदा शत्रुसेना आगमिष्यति इति ज्ञातव्यम्।

**बोधप्रश्नाः**

५. प्रश्नकाले चरलग्ने कीदृशैःग्रहैः शत्रोः पराजयं ज्ञातव्यम्?

६. प्रश्नकाले चरलग्नत्वात् कुत्र-स्थितेन चन्द्रेण शत्रोः आगमनं भवेत्?

७. "स्थिरे शशी चरोदये न चाऽऽगमो रिपोर्यदा" कस्मिन् ग्रन्थे वर्णितम्?

## ८.९ ग्रहस्थितिवशाच्छत्रुगमागमविचारः

शत्रुसेना युद्धाय-समागमिष्यति न वेत्यादिकं प्रश्नकाले ग्रहस्थित्यनुसारेण निम्नविन्दवः विचार्यन्ते –

- प्रश्नकाले यदि स्थिरलग्नं भवेत्तथा लग्नोपरि शनिगुर्वोः दृष्टिः भवेत्तदा शत्रुसमागमनं न भविष्यति।
- प्रश्नकाले यदि त्रि-पञ्च-षष्ठभावेषु पापग्रहाः स्युः तदा शत्रुसङ्गमः भविष्यतीति ज्ञातव्यम्।
- प्रश्नकाले स्थिरलग्ने गुरुः अथवा शनिः स्थितः स्यात् तदा शत्रोः आगमनं न भवेत्।
- प्रश्नकाले चरलग्ने सूर्ये गुरौ वा चेत् शत्रोरागमनं ज्ञायेत्।
- प्रश्नकाले लग्नाच्चतुर्थे भावे सूर्येन्दू स्यातां तदा शत्र्वागमनं नेति वक्तव्यम्।
- प्रश्नलग्नाच्चतुर्थे भावे शुभग्रहाः (बुधगुरुसिताः) स्युः तदा शत्रोरागमनं वदेत्।
- प्रश्नलग्नाच्चतुर्थे भावे पापग्रहाः स्युस्तदा शत्रुः आगत्य पुनः निवर्तयिष्यति इति निश्चयेदिति।

एते विषयाः दैवज्ञेन जीवनाथझा महोदयेन स्वकृत्प्रश्नभूषणे त्रिषु श्लोकेषु वर्णिताः। तद्यथा –

**शनीज्यवीक्षिते यदा स्थिरोदये न पृच्छतो।**
**गमागमौ तदा वदेत्त्रिपञ्चषष्ठगाः खलाः॥**



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**भवन्ति शत्रुसङ्गमाय वाहनोपगा यदा।**
**निवर्तनाय सूरिभिः पुरातनैरितीरितम्॥**

**पदविच्छेदः** – शनीज्यवीक्षिते, यदा, स्थिरोदये, न, पृच्छतः, गमागमौ, तदा, वदेत्, त्रि, पञ्च, षष्ठगाः, खलाः, भवन्ति, शत्रुसङ्गमाय, वाहनोपगा, यदा, निवर्तनाय, सूरिभिः, पुरातनैः, इति, ईरितम्॥

**पदान्वयः** – यदा स्थिरोदये शनीज्यवीक्षिते तदा पृच्छतः गमागमौ न वदेत्। त्रि-पञ्च-षष्ठगाः खलाः शत्रुसङ्गमाय यदा वाहनोपगाः भवन्ति तदा निवर्त्तनाय इति पुरातनैः सूरिभिः ईरितम्।

**प्रतिपदार्थः** – यदा, स्थिरोदये = स्थिरराशेः लग्ने स्थिते, शनीज्यवीक्षिते = शनिना गुरुणा च दृष्टे, तदा पृच्छतः = प्रश्नात्, गमागमौ = शत्रोः गमनागमनं, न वदेत्, त्रि-पञ्च-षष्ठगाः = तृतीय-पञ्चम-षष्ठभावगताः, खलाः = क्रूरग्रहाः, शत्रुसङ्गमाय = शत्रुसमागमस्य सूचकाय, यदा, वाहनोपगाः = चतुर्थभावगताः, भवन्ति, तदा, निवर्तनाय = शत्रोः निवर्तनस्य सूचकार्थं भवन्ति इति पुरातनैः = प्राचीनैः, सूरिभिः = विद्वद्भिः, ईरितम् = कथितम्।

**सरलार्थः** – शत्रुसम्बन्धिप्रश्नकाले स्थिरराशौ लग्ने स्थिते तथा शनिगुरुभ्यां दृष्टे सति प्रश्नात् शत्रोरागमनं न इति वदेत्। पुनः प्रश्नकाले तृतीये पञ्चमे षष्ठे च भावे स्थिताः क्रूरग्रहाः शत्र्वागमनस्य सूचकाः भवन्ति। तथा चतुर्थे भावे स्थिताः क्रूरग्रहाः शत्रुनिवर्तनस्य सूचकाः भवन्ति इति प्राचीनविद्वद्भिः उक्तम्।

पुनः उच्यते –

**चन्द्रादित्यौ चतुर्थस्थौ नायाति रिपुवाहिनी।**
**शुक्रज्ञगुरवो बन्धावरमायाति पृच्छतः॥**

**पदविच्छेदः** – चन्द्रादित्यौ, चतुर्थस्थौ, न, आयाति, रिपुवाहिनी, शुक्रज्ञगुरवः, बन्धौ, अरम्, आयाति, पृच्छतः।

**पदान्वयः** – चन्द्रादित्यौ यदि चतुर्थस्थौ (स्यातां तदा) रिपुवाहिनी न आयाति। यदि शुक्रज्ञगुरवः बन्धौ (स्युः) तदा पृच्छतः (रिपुवाहिनी) अरम् आयाति।

**प्रतिपदार्थः** – चन्द्रादित्यौ = चन्द्रसूर्यौ, यदि, चतुर्थस्थौ = चतुर्थे भावे गतौ, स्याताम्, तदा रिपुवाहिनी = शत्रुसेना, न-आयाति-न-आगच्छति। यदि, शुक्रज्ञगुरवः = शुक्र-बुध-गुरवः, बन्धौ = चतुर्थे भावे स्युः तदा पृच्छतः = प्रश्नात्, रिपुवाहिनी = शत्रुसेना, अरं = शीघ्रम्, आयाति।

**सरलार्थः** – प्रश्नकाले यदि चतुर्थे भावे चन्द्रसूर्यौ स्यातां तदा शत्रुसेना न आयाति। परन्तु प्रश्नकाले शुक्र-बुध-गुरवः चतुर्थे भावे स्युः तदा शीघ्रमेव शत्रुसेना समागच्छति। इति।

तथैव षट्पञ्चाशिकायामपि –

**नागच्छति परचक्रं यदाऽर्कचन्द्रौ चतुर्थभवनस्थौ।**
**बुधगुरुशुक्रा हिबुके यदा तदा शीघ्रमायाति॥**

**पदविच्छेदः** – न, आगच्छति, परचक्रं, यदा, अर्कचन्द्रौ, चतुर्थभवनस्थौ, बुध-गुरु-शुक्राः, हिबुके, यदा, तदा, शीघ्रम्, आयाति।

**पदान्वयः** – यदा अर्कचन्द्रौ चतुर्थभवनस्थौ (तदा) परचक्रं न आयाति। यदा हिबुके बुध-गुरु-शुक्राः (स्युः) तदा शीघ्रमायाति।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**प्रतिपदार्थः** – यदा अर्कचन्द्रौ = सूर्यचन्द्रौ, चतुर्थभवनस्थौ = चतुर्थे भावे गतौ स्याताम्, तदा, परचक्रम् = शत्रुसेनादिकं, न, आयाति = आगच्छति, यदा, हिबुके = चतुर्थे भावे, बुध-गुरु-शुक्राः ग्रहाः स्युः, तदा शीघ्रमायाति = शत्रुसेना शीघ्रमागच्छति।

**सरलार्थः** – प्रश्नकाले यदि सूर्यचन्द्रौ चतुर्थभावगतौ स्यातां तदा शत्रुसेना न आगच्छति। पुनः यदा प्रश्नकाले चतुर्थे भावे बुध-गुरु-शुक्राः स्युः तदा शीघ्रं शत्रुसेना समागच्छति इति दैवज्ञः विजानीयात्।

पुनः उक्तम् –

**चलितो न रिपुर्जीवो मन्दो वापि स्थिरोदये।**
**चरोदये चेदादित्यो जीवो वाऽऽयाति सत्वरम्॥**

**पदविच्छेदः** – चलितः, न, रिपुः, जीवः, मन्दः, वा, अपि, स्थिरोदये, चरोदये, चेत्, आदित्यः, जीवः, वा, आयाति, सत्वरम्।

**पदान्वयः** – जीवः मन्दः वा अपि यदि स्थिरोदये स्यात्तदा रिपुः चलितः न, इति। चेत् आदित्यः, वा जीवः चरोदये स्यात् तदा सत्वरम् आयाति।

**प्रतिपदार्थः** – जीवः = गुरुः, मन्दः = शनिः, वा, अपि, यदि, स्थिरोदये = स्थिरलग्ने स्यात्तदा, रिपुः = शत्रुः, चलितः न = न आगच्छति इति भावः। चेत् = यदा, आदित्यः = सूर्यः, वा = अथवा, जीवः = गुरुः, चरोदये = चरलग्ने स्यात्तदा, सत्वरं = शीघ्रम्, आयाति = आगच्छति इति।

**सरलार्थः** – प्रश्नकाले यदि स्थिरलग्ने गुरुः अथवा शनिः स्यात्तदा शत्रुः न आगच्छति। तथा यदि चरलग्ने सूर्यः अथवा गुरुः स्यात्तदा शीघ्रमेव शत्रुः समागच्छति इति दैवज्ञेन ज्ञातव्यम्।

तथैवोक्तं - षट्पञ्चाशिकायामपि –

**स्थिरराशौ यद्युदये शनिर्गुरुर्वा स्थितस्तदा शत्रोः।**
**उदये रविर्गुरुर्वा चरराशौ स्यात्तदाऽगमनम्॥**

**पदविच्छेदः** – स्थिरराशौ, यदि, उदये, शनिः, गुरुः, वा, स्थितिः, तदा, शत्रोः, उदये, रविः, गुरुः, वा, चरराशौ, स्यात्, तदा, आगमनम्॥

**पदान्वयः** – यदि उदये स्थिरराशौः शनिः वा गुरुः तदा शत्रोः स्थितिः, यदि उदये चरराशौ रविः वा गुरुः स्यात् तदा आगमनम् (इति वदेत्)॥

**प्रतिपदार्थः** – यदि, उदये = लग्ने, स्थिरराशौ, शनिः = शनिग्रहः, वा = अथवा, गुरुः = गुरुग्रहः, स्यात् तदा, शत्रोः स्थितिः = शत्रो अनागमनं (मार्गे एव अवरोधः) यदि, उदये = लग्ने, चरराशौ, रविः = सूर्यः, वा = अथवा, गुरुः = बृहस्पतिः स्यात् तदा आगमनं = शत्रोरागमनम् इति वदेत् दैवज्ञ इति शेषः।

**सरलार्थः** – प्रश्नकाले यदि लग्ने स्थिरराशिः स्यात् तथा तत्र शनिः अथवा गुरुः भवेत् तदा शत्रुः मार्गे एव अवरोधितः नागमिष्यति इति ज्ञातव्यम्। तथा यदि लग्ने चरराशिः स्यात् तत्र च सूर्यः अथवा गुरुः भवेत्तदा शत्रुः आगमिष्यति इति दैवज्ञः वदेत्।

## ८.१० शत्र्वागमनकालज्ञानम्



शत्र्वागमनकालविषये तु प्रश्नभूषणे नोक्तम्, परन्तु षट्पञ्चाशिकायां दैवज्ञेन पृथुयशसा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



विवर्णितम् वर्तते यत् प्रश्नलग्नात् चन्द्रः यावत्संख्यकराशौ स्यात् तावद्भिः दिनैः शत्रोः आगमनं भवति। परन्तु अत्र निर्देशः वर्तते यत् लग्नचन्द्रमसोर्मध्ये अन्यः ग्रहः कश्चिद् न स्यादिति। उक्तं यथा –

**उदयर्क्षाच्चन्द्रर्क्षं भवति च यावद्दिनैश्च तावद्भिः।**
**आगमनं स्याच्छत्रोर्यदि मध्ये न ग्रहः कश्चित्॥**

**पदविच्छेदः** – उदयर्क्षात्, चन्द्रर्क्षं, भवति, च, यावत्, दिनैः, च, तावद्भिः, आगमनं, स्यात्, शत्रोः, यदि, मध्ये, न, ग्रहः, कश्चित्।

**पदान्वयः** – उदयर्क्षात् चन्द्रर्क्षं यावत् (अन्तरेण) भवति तावद्भिः दिनैः शत्रोः आगमनं (भवति), यदि मध्ये कश्चिद् ग्रहः न स्यात्।

**प्रतिपदार्थः** – उदयर्क्षात् = उदयराशितः, चन्द्रर्क्षं = चन्द्रस्थितेः राशिं, यावत् = यावत् संख्यकेन अन्तरेण भवति, तावद्भिः अन्तरतुल्यैः दिनैः, शत्रोः आगमनं भवति। यदि, मध्ये = लग्नचन्द्रमसोर्मध्ये, कश्चिद् ग्रहः = अन्यः कश्चिद्ग्रहः, न स्यात्।

**सरलार्थः** – शत्रुप्रश्ने यदि शत्रवागमनयोगः स्यात्तदा प्रश्नलग्नचन्द्रमसोर्मध्ये यावद्राशेः अन्तरालं भवेत् तावद्भिः दिनान्तरैः शत्रोः आगमनं ज्ञातव्यम्। अत्र यदि लग्नचन्द्रमसोर्मध्ये अन्यः कश्चिद् ग्रहः न स्यात्तदा एव ज्ञातव्यम् इति।

उदाहरणार्थं यदि शत्रु आगमनप्रश्ने चरलग्ने सूर्यः अथवा गुरुः शीघ्रं शत्रवागमनं सूचयति (पाठांश ८.९.... श्लोके)

अतः कदाचित् प्रश्नकुण्डली एवं स्यात् –




अस्मिन् लग्ने तुला (चरराशिः) अस्ति तत्र च स्थितो गुरुः "चरोदये चेदादित्यो जीवो वाऽऽयाति सत्वरम्" इत्यनेन शीघ्रशत्रवागमनयोगं निर्माति। अस्यां परिस्थितौ लग्नात् चन्द्रं यावत् पञ्चराशेः अन्तरं वर्तते। अतः पञ्चभिः दिवसैः शत्रोरागमनं वक्तव्यम् इति।

**बोधप्रश्नाः**

८. प्रश्नकाले चरलग्ने सूर्येण शत्रोरागमनं भवति न वा?

९. प्रश्नलग्नाच्चतुर्थे गताः शुभग्रहाः शत्रवागमनस्य सूचकाः भवन्ति। सत्यम् असत्यं वा ?

१०. शत्रवागमनं कियद्भिः दिनैः भवति ?

**मूलपाठः**

**सुखालयेऽलिकुम्भमीनकर्कटा भवन्ति चेद्।**
**रिपोः पराजयस्तदा पलायनं चतुष्पदैः॥**



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



सुतारिभावगैः खलैर्निवर्ततेऽरिवाहिनी।
खलैश्चतुर्थभावगैः समेत्य यात्यरं परः॥

चरोदये शुभः शुभं करोति यायिनामरं।
खलैरशोभनं तदा स्थिरेऽपि वा सुशोभनम्॥

निशापतिः स्थिरे चरे तनावरेर्न चागमः।
तदागमो विपर्यये विपर्ययः पुरातनैः॥

स्थिरेशशी चरोदये न चाऽऽगमो रिपोर्यदा।
तदाऽऽगमं रिपोर्वदेद्विपर्यये विपर्ययम्॥

द्विरात्मभावगे विधौ स्थिरोदयेऽरि वाहिनी।
सुदूरमागता सती निवर्त्तते यदा तदा॥

द्विदेहभे तनौ शशी चरेऽपि सा निवर्तते।
विपर्ययेऽरिवाहिनी द्विषत्पुरं समेति सा॥

शनीज्यवीक्षिते यदा स्थिरोदये न पृच्छतो।
गमागमौ तदा वदेत्त्रिपञ्चषष्ठगाः खलाः॥

भवन्ति शत्रुसङ्क्रमाय वाहनोपगा यदा।
निवर्तनाय सूरिभिः पुरातनैरितीरितम्॥

चन्द्रादित्यौ चतुर्थस्थौ नायाति रिपुवाहिनी।
शुक्रज्ञगुरवो बन्धावरमायाति पृच्छतः॥

चलितो न रिपुर्जीवो मन्दो वापि स्थिरोदये।
चरोदये चेदादित्यो जीवो वाऽऽयाति सत्वरम्॥

## ८.११ सारांशः

भवता पाठोऽयं "शत्रुप्रश्नः" इत्याख्यः पठितः। पाठेऽस्मिन् शत्रोः वृत्तान्तज्ञानार्थं, युद्धेः जय-पराजय-शत्रुपलायन-शत्रुनिवर्तनेत्यादयः विषयाः पठिताः। शत्रुवृत्तान्तप्रश्ने प्रश्नलग्नात् चतुर्थे भावे कर्क-वृश्चिक-कुम्भ-मीनराशिषु कश्चिदेकः स्यात्तदा आक्रान्ताशत्रोः पराजयः भवति। किं वा मेष-सिंह-वृश्चिक-धनुलग्नेषु प्रश्नात् शत्रोः पराजयः ज्ञातव्यः। प्रश्नलग्नात् चतुर्थे भावे चतुष्पदराशिषु कश्चिदेकः स्यात्तदा शत्रुपलायनं ज्ञातव्यम्। तथैव प्रश्नलग्नात् पञ्चमे-षष्ठे अथवा चतुर्थे भावे पापग्रहाः स्युः तदा शत्रोः निवर्तनं ज्ञातव्यम्। शत्रुवृत्तान्तप्रश्ने चरलग्ने शुभग्रहैः शत्रोः शुभत्वं तथा अशुभग्रहैः शत्रुपराजयं ज्ञातव्यम्। तथैव स्थिरलग्नेऽपि शुभ-पापग्रहैः शत्रोः जयः पराजयो वा ज्ञातव्यः। शत्रुसमागमः भविष्यति न वेत्यादिकं प्रश्ने चन्द्रः स्थिरराशौ भवेत् लग्ने च चरराशिः स्यात्तदा शत्रागमनं न भवति, परन्तु चन्द्रः चरराशौ भवेत् लग्ने च स्थिरराशिः स्यादथवा लग्ने द्विस्वभावराशिः स्यात् चन्द्रश्च चरराशौ भवेत्तदा शत्रुः समागत्य पुनः निवर्तयिष्यति इति दैवज्ञेन ज्ञातव्यम्। तदनन्तरं ग्रहाणां स्थित्यनुसारेण शत्रुसमागमज्ञाने बिन्दवः निरूपिताः यदि प्रश्नकाले स्थिरलग्नं शनिगुरुभ्यां दृष्टः तदा शत्रुसमागमः न भवेत्। त्रिपञ्चषष्ठभावेषु पापग्रहाः स्युः तदा शत्रुसङ्क्रमः भवेत्। प्रश्नकाले स्थिरलग्ने गुरोः शनेर्वा स्थिते शत्रागमनं भवेत्। प्रश्नलग्नात् चतुर्थे भावे सूर्येन्दू स्यातां तदा शत्रागमनं न भवेत्। प्रश्नलग्नाच्चतुर्थे भावे शुभग्रहाः स्युः तदा शत्रोरागमनं तथा यदि पापग्रहाः स्युस्तदा शत्रुः आगत्य पुनर्निवर्तयिष्यति इति दैवज्ञेन निर्दिष्टव्यम्। शत्रागमनस्य



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



कालज्ञानार्थं निरूपितं यत् शत्रागमनयोगे प्रश्नलग्नात् चन्द्रपर्यन्तं यावद्राशेः अन्तरं स्यात् तावद्भिः दिनैः शत्रागमनं भवेदिति ज्ञातव्यम्। एवम्प्रकारेण पाठेऽस्मिन् शत्रुवृत्तान्तसम्बन्धिताः विषयाः प्रश्नकुण्डलीमाध्यमेन ज्ञानार्थं सुविस्तृतरूपेण वर्णिताः इति।

## ८.१२ शब्दावली

| | | | |
|---|---|---|---|
| १. | निवर्तनम् | = | प्रतिगमनम्। |
| २. | रिपुः | = | शत्रुः। |
| ३. | सुखालये | = | चतुर्थे भावे। |
| ४. | अरं | = | शीघ्रम्। |
| ५. | अरिवाहिनी | = | शत्रुसेना। |
| ६. | भग्नः | = | पराजितः। |
| ७. | यायी | = | आक्रमणकारी। |
| ८. | दुर्गभंगः | = | पराजयः। |
| ९. | हिबुके | = | चतुर्थभावे। |

## ८.१३ सन्दर्भग्रन्थः

१. प्रश्नभूषणम् (दैवज्ञजीवनाथझा), आचार्यः गुरुप्रसादगौडः, चौखम्भासुरभारती-प्रकाशनम्, वाराणसी।

## ८.१४ सहायकग्रन्थाः

१. **प्रश्नवैष्णवः**, पं. श्रीउमाकान्तझाः, नागप्रकाशक, यू.ए. जवाहरनगर, दिल्ली।

२. **भुवनदीपकम् (विज्ञानभाष्यः)**, शुकदेवचतुर्वेदी, रंजनपब्लिकेशन, अंसारीरोडदरियागंजः, नई दिल्ली।

३. **षट्पञ्चाशिका**, डॉ. सत्येन्द्रमिश्रः, चौखम्भासंस्कृतसंस्थानम्, वाराणसी।

४. **ताजिकनीलकण्ठी**, डॉ. शिवप्रसादशर्मा, आचार्यश्रीनिवासशर्मा, भारतीय-विद्याप्रकाशनम्, दिल्ली।

## ८.१५ बोधप्रश्नोत्तराणि

१. षष्ठभावः।

२. शत्रोः पराजयः।

३. शत्रोः पलायनम्।

४. शत्रोः निवर्तनम्।

५. अशुभग्रहैः।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



६. स्थिरराशिगतेन चन्द्रेण।

७. षट्पञ्चाशिकायाम्।

८. शत्रोरागमनं भवति।

९. सत्यमस्ति।

१०. प्रश्नलग्नात् चन्द्रपर्यन्तं यावद्राशेः अन्तरं भवति तावद्भिः दिनैः शत्र्वागमनं भवति।

## ८.१६ अभ्यासप्रश्नाः

१. केषु केषु लग्नेषु प्रश्नात् शत्रोः पराजयः अथवा पलायनं भविष्यति इति ज्ञातुं शक्यते ?

२. शत्रुनिवर्तनयोगद्वयं लेख्यम्।

३. द्वयोः कालयोः निर्देशः कार्यः यत्र प्रश्नात् शत्रोः आगमनं ज्ञायते।

४. शत्र्वागमनयोगे कस्मिन् शत्र्वागमनकालं कुण्डलीं निर्मीय निर्दिष्टताम्।

—•—



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

## स्वप्नः

संस्कृते पारम्परिक-आधुनिकज्ञानवैदुष्यस्य समन्वयनदृशा संस्कृतशिक्षायाः वैश्विकपरिप्रेक्ष्यस्य उपस्थानम्।

## सङ्कल्पः

- संस्कृतनिष्ठज्ञानसरण्याः उत्तमावबोधस्य सर्जनम्।
- संस्कृतशिक्षान्तर्गतानाम् अभिनवविषयाणां संवर्धनम्।
- आधुनिकसमाजोत्कर्षाय सम्भावनानां प्रकाशनदृष्ट्या संस्कृतभाषायाः तत्साहित्यस्य च प्रासङ्गिकतायाः आविष्करणम्।

Kirtikant Sharma Collection, Najafgarh